No. ४२४२

Title शास्त्रदीपिका दशमाध्यायः

Author पार्थसारथि मिश्रः

Extent ६६ पत्र Age सं. १८६४

Subject मीमांसा

शास्त्रदीपिकादशमाध्यायः

५२५२

शास्त्रदीपिकायां दशमोध्यायः पत्रे ७६

शा.र. ॥ ॥श्रीगणेशायनमः॥ ॥विधेःप्रकरणान्तरेऽतिदेशात्सर्वकर्म्मस्यात् ऊहेसिद्धेऽतिदिष्टानांबाधाभ्युच्चयचिंतया॥एतावद्ग्र
१ न्थानांविकृतिष्वभिधीयते॥अतिदिष्टपदार्थविषयत्वाद्बाधस्याप्यूहवदतिदेशोत्तरकालमारंभः॥ननुऊहबाधयोर्नमिथो
हेतुहेतुमत्ता।ऊहोनामप्राकृतस्यप्रयोगस्यान्यथाभावः।नचतदधीनोबाधः।कृष्णलेषुत्ववघातस्यबाधः।नचतत्रोहोस्ति
अननुष्ठानात्॥तस्यानुष्ठीयमानस्यप्रयोगे विकारोस्ति।यत्रचोहोनीवारादौनतत्रबाधइतिविषयभेदान्नानयोरन्यो
न्यहेतुहेतुमत्ता।यत्रहिद्रव्यांतरेदेवतांतरेवाप्राकृतंप्रयोजनमस्तितद्विषयकऊहः।यत्रतुनास्तितत्रबाधः।सत्यमेवं।त
थाप्यूहस्यपदार्थगतरूपांतरात्मकत्वेनपदार्थप्रसासत्वेस्तस्याप्तिचिंतानंतरंचिंताकृता।बाधस्तुतन्निवृत्त्यात्मकःपश्चा
च्चिंत्यते॥तत्रप्रथमंतावदिदंचिंत्यते।किंसर्वंप्राकृतंविकृतौकर्त्तव्यंउतलुप्तप्राकृतप्रयोजनंनकर्त्तव्यमितितदर्थ
मिदंविचार्यते।किंप्राकृतमगजानमंगशास्त्रंवास्वरूपेणैवानाहृतप्रयोजनंविकृतावतिदिश्यते॥सौर्येणभावयेत्क राम
र्यंआग्नेयस्यपात्संगानितानिकृत्वेति॥उतपदार्थकार्याणियानिदृष्टादृष्टरूपाणितद्द्वारासंपादनायआग्नेयादिगतोपा १

रः सोऽतिदिश्यते। सौर्येण भावयेत् कथं यथाग्नेयेन तथेति। तत्र पूर्वस्मिन्सूत्रे निर्देशार्थं गनां भावानां पदार्थानां प्राकृतप्र
योजनानां नानारूपेण विरुद्धतावेव यथासंभवं दृष्टादृष्टप्रयोजनकल्पनानां स्वयं दिने स्वविहितं बिल्ववनमदृष्टार्थं तथा कर्तव्य
६४स्य३ मिति नास्ति बाधः॥ उत्तरत्र तु प्राकृतस्य फलवत्कार्यस्य स्वयं दिने बर्हिष्यभावेनानतिदेशात्तत्र वचनस्वरूपस्य वा नातिदेशान्न
कर्तव्यं लवनमिति सिध्यति बाधः॥ तत्रोपदेशवदतिदेशोऽपि पदार्थपूर्वक एव युक्तः। उपदेशानुरूपत्वात्तस्येति मत्वा नः। सर्वे
कर्तव्यं न च किंचिद्बाधितव्यमिति साह सिद्धान्तस्तु॥ अपेक्षाहन्निर्योगधैर्यरूपकारातिदेशनं। नत्र भावार्थानामतिदेशोन
फलमनेयागेन भावयेदिति हि यथा यागः फलसाधनं भवति तथा आप्रियेते स्यर्थः॥ कथमिति केन व्यापारेण यागः फल
साधनतामायद्यते सैवं यागस्य फलसामर्थ्यजनने व्यापारविशेषोपेक्षितः॥ ननु व्यापारमात्रं ये नावघातादिव्यापारः
स्वरूपेणातिदिश्येत अवघातप्रयाजादिजन्यदृष्टादृष्टोपकारसंपादनं तु भवति यागस्य फलसामर्थ्यजनने व्यापारः
॥ तस्मादपेक्षावशादुपकारसंपादनस्यैवातिदेशो न पदार्थानां। तथा सन्निधिरपि तस्यैव वैकृतं वाक्यं चोदनासामान्ये

पा॰ १० तत्प्राकृतं प्रधानवाक्यमुपस्थापयति। तच्च वाक्यं स्वार्थमुपस्थापयति॥ तस्य च स्वार्थोऽत्र यथोक्ता भावना। तत्र साध्यसा
२ धनांशत्रयवत्यपि न त्वादृष्टसन्नीयांशेऽङ्गत्वेन। सर्वाङ्गजन्योपकारसंपादनात्मनामङ्गस्वरूपाणि। तथा कथमाकाङ्क्षारूपपूर
णयोग्यतापि यागगतव्यापारस्यैव नोऽङ्गानां। तस्माद्यथासंनिधियोग्यतैः कार्याणामेवात्र पदार्थविशिष्टानामतिदेशः॥ न
पदार्थस्वरूपाणामपेक्षाद्यभावान्। एवं शास्त्रस्य तद्रूपाणां एवं च विशिष्टकार्यातिदेशपूर्विको विशेषणानां पदार्थानाम
तिदेशः॥ न तच्च यस्यां विकृतौ यत्प्राकृतं कार्यं न संभवति तस्यां तस्यासंभवादेवानतिदेशात्तद्द्वारेण पदार्थस्यापि स्वरू
पस्य नास्त्येवातिदेशः। तदिदमुक्तं तु सप्राकृतप्रयोजनं न चोदकश्चोदयतीति। यत्तु पदार्थानन्तरकं न तु यत्र कृतिनमुपका
रस्य स्वरूपमतिदिश्यते तस्य जनकापेक्षायां पदार्था नाम पि पुनर्विकृतसपूर्वेणानादृष्ट्यादरं च यमिच्छति। तन्मते तु सप्राकृ
तद्वाराणामपि नादृष्ट्यावगमात्तदुपपत्तेद्वारान्तरं परिकल्प्यानुष्ठानं स्यात्। पदार्थापोहे न च स्वरूपमतिदिश्यते। किं राम
तत्स्वरूपमतिदिष्टव्यं। ततावत्स्म कृतस्तु उपकारव्यक्तिर्विकृतौ शक्या कर्तुं नादृष्टस्य रूपकारो निदिश्येत॥ नादृष्टकं च नदर्शय २

संबंधितया नहि निवर्त्तेत ।

र्णमाससंबंधिना संभवति तेन प्रयाजादिमन्तयैव नान्यदिति तावत् कृत्स्नातिदेशोपि सिद्ध एव परार्था नाम निर्देशोपि विशिष्ट।
विधिनैव विशेषणानां विधिरिति न्यायः पृथक्परार्था निर्देशाः ॥ सामान्यतं । कारणभेदे कार्यभेदस्य स्वाभाव्यं भावात् प्रयाजाद्यधी
नमुपकारं न राद्धान्तेन सर्वदर्शपूर्णमासोपकारे पक्तुत्वमुपकार रूपं न रहति दिष्ट न रहति न पापि तन एवं प्रयाजादि प्राप्तिः
सिद्धो न नहि तस्य तस्मादन्यत्तस्य नादि संभवः कारणभेदे कार्यभेदादिति त्वयैवोक्तत्वात् तस्मादनर्थको यं परार्था निर्देशः केव
लमहवाधविषा नापस्मादिसाद्यानावत् । ननु सन्नमेविधानातिदेशात् स्फक्तं विधानं न प्रज्ञालुणं मनः कथमिह त्वाभ्यातिदे
शो निराक्रियते । उच्यते । कार्यातिदेशार्थिको यः शास्त्रातिदेशास्तदभिप्रायं न तत् ॥ अपि च विधानं शब्देन प्राकृतस्य प्रधानवि
धेर्यो नियमांशः स उच्यते न च स मिधोयत्न निव्रीहीन् अवहंतीति प्रसक्तस्य नमात्रं प्रधानवाक्यस्य शेषः किं तर्हि कल्पितकार्यवाविश
हसदित्नमीदृशमंगशास्त्रं प्रधाने न विनियोगीकुर्यादुविरिति न न शेषदशासैवा निर्देशः ॥ ईदृशास्य च कर्मस्तल्लवत्तराव निर्देशासंभ
वात् सिद्धो बाधः । तस्मात्तत्तु सार्थानां प्रकृतिवत्कुर्यादिति सेनावत्मात्रा लोवनया सहेति प्राप्तिमवगानामपि भ्रांतीकृतस्य न द्युतिवक्तांगवि

श्या॰ १० षयमतिदेशशास्त्रमुपसंक्रियते। तेन नस्वयं दिनं वर्हिर्भवनी सारैलवनादयस्तन्मंत्रास्तत्साधनभूता अपरभ्यादयो न प्रवर्त्तंते
२ एवं वा प्राजापसंघृतेव रुद्रं निर्वपेद् ननु रुद्रस्तत्र मासुष्काम इति श्रूयते। तत्रावघातः कर्त्तव्यो नेति संशये चहुं एशेववैवरुधा।
र्म्मविधानार्थः॥ तेन नु मार्यौप्यवघातो वचनाछ्छ्यणवत्कर्त्तव्य इति विशेषाशंका॥ विनाप्यवघातेनालुतापैरेवधर्म्मैर्वैशेष
नवोपपन्नश्चरुः शक्येनावघातं प्रापयितुमलं॥ अपणं तु धर्नेऽप्रयपनी साहसविधानात् क्रियत इति वैषम्यं एवं वा वैश्व
देवं चरुं निर्वपेद्ग्रामान्नं नवर्हिषद्रं रुत्कशाम्ययास्केन वयूहेत ररमहमसुंचामुंच ब्रूहामीतिपं द्विष्यात्तं ध्यायेन यदधो
वमूमेनयचत्त्वस्फ्य आभिष्येन न हि स्त्रवत्रुहृक् मायावघनीति श्रूयते। तत्र संशयः किं वैश्वदेवे विकरेवता वाहनकाले वि
ष्मा गवाहनं कर्त्तव्यं नेति। तत्र चोदकप्राप्तेः कर्त्तव्यं किंच पुनश्चोदकप्राप्तिः॥ नहीयं देवतावाहनस्य आः कस्याश्चिद्देवतायाः कार्यं वर्त्तते
॥ किं प्राकृतकार्यं यं। अतो नाप्यपावरस्तरणवर्हिषी वा वर्हिर्द्दर्म्मौ नावाहनं प्राप्नोति सत्यं। वैश्वदेवे विकल्पो रकेन न प्राप्नोति स्वयमेव
लपं वैस्तव याग औषधद्रव्यक द्वारेकरेव नात्ताद्याग्नेयविकारः॥ तत्र वैश्वदेवे विकल्प नं च मध्यपातान्सर्वाण्यंगानि प्रसंगेनोपकु राम॰ २

वैनीतिन पृथक्कृत्क्रियते॥ आवाहनं त्वकृतार्थत्वात्कर्तव्यमिति प्राप्ते ब्रूमः। नैमित्तिकविधेर्निमित्तापेक्षत्वान्निमित्तस्य च सत्प्रत्यक्षे
षादेरवश्यंभावाभावेन देवतावाहनकाले निश्चयासंभवात् निश्चितसद्भावमनुक्रम्य यागविधानं नावाहनं प्रयोक्तुं समंत्रवि
हितं चावाहनं कृतमपि निष्फलमेव तस्मान्न कर्तव्यं इष्टिरारंभसंयोगादंगभूतानि वर्तेनारंभस्य प्रधानसंयोगात्॥ दर्श
पूर्णमासयोरारंभणीयाकृता सा विकृतिष्वपि कर्तव्येति ह्यादृशे वक्ष्यते। सा किं सा किं सोमांगभूतासु दीक्षणीयादिषु कर्तव्या
नेति विचारः॥ कर्तव्या चोदकप्राप्तेरिति प्राप्तेऽभिधीयते। अंगभूतास्त्वियं तु सद्वारत्वान्न प्रवर्तते। आरभ्यमानपुरुषसंस्का
रार्थेयमिष्यते। नारंभो दीक्षणीयादेः प्रधानारंभसिद्धितः। आरंभद्वारेणारंभणीया प्रकृतावंगमासीत्। अतो विकृतिष्वपि
तद्वारैव प्राप्तिः। न चांगभूतासु दीक्षणीयादिष्विष्टिष्वात्मीय आरंभोऽस्ति। ज्योतिष्टोमे तावन्न कर्त्तव्यानस्यापूर्वत्वात्। दीक्षणी
वस्थायाम२ देश्च तस्या मध्यपातावसरत्वात्॥ ज्योतिष्टोमे च प्रवृत्तोऽर्थादंगेष्वपि प्रवृत्तो भवति। प्रथमं च प्रवर्तनमारंभः। तेन प्रधानार्थेनैवां
रंभेणांगानामारंभत्वान्न तेषां पृथगारंभोऽस्ति। तदभावाच्च न द्वारारंभणीयानुमार्थत्वान्न कर्त्तव्या॥ ॥ प्रधानाच्चान्यसंयुक्तानस

श्रा॰ १॰ वीरंभान्निवर्त्तेतांनगतत्वात् अथ यश्चेष्टिकाम्यमानिचकर्म्माणिसमप्रधानान्येकफलसाधनत्वेन चोदितानि यथाराजसूयेन
४ त्रकिमेष्टिकेष्टारंभणीयास्यात्रवेति॥ पूर्वोधिकरणेप्रधानविषयत्वारंभोनांगानामित्युक्तं। इह सर्वेषांप्रधानत्वादिष्टीनाम
प्यस्यारंभःतेनात्कुत्वार्थत्वाद्दारंभणीयाकर्त्तव्येति प्राप्ते ब्रूमः। प्रकृतौ हियदंगमाभारंभणीयानद्विषयत्वारंभोद्दारंदर्श
पूर्णमासावारभ्यमानइतिवचनात् इहविष्टिपशुसोमानामेकप्रयोगभाजामेकः सर्वेषु त्वासक्त आरंभोनेष्टिभिर्व्यप
तेना देष्टुंशक्यते॥ अग्नीषोमीयहविरिवाग्निनांत्रापीष्टीनामारंभाभावाद्दत्वर्थैवारंभणीया तस्मात्कुस्तावपाजवत् किमा
रंभणीयायामारंभणीयाकर्त्तव्यानेतिसंशयः। नत्वंगभूतेयंदर्शपूर्णमासयोः अतो दीक्षणीयादिवदस्यां नकर्त्तव्या तस्माद्द
नार्थमेतत्॥ उच्यते॥ सत्यमंगभूतातथापि पृथगारंभाभवति नप्रधानारंभेणास्ति ध्य तिन तस्यां वेलायामारब्धौ दर्शपूर्णमा
सौ। तयोरारभ्यमाणयोरेषाविहिता। यदिवारब्धौ भवेतां ततआरंभणीयेव नकर्त्तव्या। साहि कर्तारमारंभयोग्यंकर्तुं क्रियते। राम॰
नोचेदारब्धौ किमर्थासा तस्मादारभ्यमानयोर्दर्शपूर्णमासयोः क्रियमाणेयं पृथगारंभाभवन्तीसत्कुत्वर्थत्वादस्यामारंभणी ४

दूत्तरं १ याकर्त्तव्या। नैवं। अशक्यासावतिदेष्टुं साहीदानीं विधीयते। यत्तस्मादर्शपूर्णमासागतं वं सनेयत्र प्रकृतावज्ञातं नन तद्विकृतावतिरे
ष्टुं शक्यं नह्येतदेकमेव वाक्यमविहितवद्दर्शपूर्णमासयोरेतां विदधाति। विहितवच्चातिदिशतीति न कथं विरुद्धकल्पने। तस्मा
त्तद्व्यतिरिक्तेन कर्त्तव्यता नातिदिश्यते। कर्म्मान्तरद्रव्यसंयोगार्थमर्थाभावान्निवर्त्तेत तादर्थ्यश्रुतिसंयोगात्। साद्यस्के श्रूयते ख
लेवाली यूपो भवतीति प्रकृतौ चास्ति यूपाहुतिः यूपमच्छेष्यता होतव्यमिति। सा किं खलेवाल्यां कर्त्तव्या नेति संशये अतिदेश
प्राप्तेः कर्त्तव्येति प्राप्ते तु सार्थत्वादकर्त्तव्येसा। कथं यूपं छेत्स्यता होतव्यमिति छेदनार्थो होमः। नैव खलेवाल्यां छेदनमस्ति स्व
देशावस्थितायामेव तस्यां पशुर्वध्यते अतस्तत्र न यूपाहुतिः कर्त्तव्या स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयते॥ तत्रैव स्था
णावस्थाणावाहुतिं जुहोतीति। सा किं यस्मिन् कस्मिंस्थाणौ वा आरादुपकारकत्वेन कर्त्तव्या सती खलेवाल्यामपि स्यात् किं वा यूपाव
श्च स्थाणौ कर्त्तव्या तद्वारेण यूपस्यैव संस्कारार्था सती खलेवाल्यामाव्रश्च स्थाणोरभावे न लुप्तार्थत्वादकर्त्तव्येति विचा
रे यूपविरोजिनस्थाणौ क्रियमाणा तद्वारेण शक्नोति यूपस्योपकर्त्तुं तस्मादारादुपकारिका खलेवाल्यां कर्त्तव्येति प्राप्ते ब्रूमः॥

शा. १० आव्रश्चनस्याणोः सन्निधानात्तद्द्वारेणैव संस्कारत्वे संभवत्यारादुपकारकत्वानुपपत्तेर्यूपसंस्कारार्थेयं वियोजितेपि स्थाणौ यू
पीयोसावित्येवं क्रियमाणा शङ्कास्येव यूपस्योपकर्तुं देवदत्तधारिणा धारवस्त्रजः शुचिदेशनिधानं देवदत्तस्य यद्यपि चार
५ ष्ट एव संस्कारस्तथापि संस्कारत्वमेव संबद्धोपकारित्वलाभादसंबद्धोपकारिण आरादुपकाराज्ज्यायः। तस्मात्तत्वेवास्मान
अन्यस्य स्वधः कर्तव्या प्रयाजेचतत्राप्यवान् अस्ति दर्शपूर्णमासयोरुत्तमः प्रयाजः स्वाहाकारं यजतीति सक्लिमारादुपकारकः उत्ता
ग्नभागादिषु यक्ष्यमाणानामग्न्यादिदेवतानां संस्कार इति॥ तदर्थमिदं विचार्यते। किं स्वाहाकारं यजतीति देवताविधिः
उत नामधेयं स्वाहाग्निं स्वाहा सोममित्यादिमंत्रवर्णाद्देवताविधिरिति। तत्र वचनाद्देवतालाभेन मंत्राकल्पनं क्ष मं। तस्माश्रा
नुयोगित्वाद्देवतारादुपक्रियाः न हि चतविहितदेवतासंभवे स्वाहाग्निं स्वाहा सोममित्यादिना तत्कल्पना युक्ता न चायं मंत्रः क
रणत्वेन शक्यो विधीयते यतस्तेयतत्तद्देवतानामग्न्यादीनां देवतात्वं कल्प्यते॥ क्रमप्रकरणाविनियोज्योसौ न चाविज्ञातसा राम.
मर्थ्यस्ताभ्यां विनियोक्तुं शक्यते न चाग्न्यादिप्रतिपादकस्य मंत्रस्याविज्ञानदेवसयोगे सामर्थ्यमवगम्यते। तेन वाचनिकं देवता ५

विधानमाश्रित्य मन्त्रे तेनाग्न्यादिशब्दानां मानत्वशब्दवद्ग्राहकत्वं विहन्निरंगीकर्तव्या॥ अतो न मांत्रवर्णिकी देवतेत्यारादुपका
रकः॥ किंच। न वायं स्वाहाकारो मंत्रवर्णाद्बकल्पयितुं। तेन स्वाहाकारदेवताकयागविधानमिदं न च स्वाहाकाराख्यादेव
तान्यत्रोपयोगिनी या संक्षिप्तेन। तस्मादारादुपकारकमिदं कर्मेति प्राप्त उच्यते॥ न देवताविधौ शक्तिर्द्वितीयांतस्य विधा
ने। न च यागविधौ श्रीणोविधत्ते देवतां विधिः। न ह्येकार्थविधिसंभवे त्वनेकार्थविधिर्युक्तः। संभवति चात्र यागमात्रविधानं
स्वाहाकारशब्दस्य स्वाहाग्निमिसादि मंत्रसंबंधेन नामधेयत्वसंभवात्। करणत्वं च क्रमसहितात्मकरणाद्वत्र्यते मंत्रस्या
न चासामर्थ्यं क्लिश्चिन्तं येन विनियोगो न स्यात्। संभवति यागदेवताप्रतिपादकस्य मंत्रस्य प्रकाशनसामर्थ्यं यदि यागोयं न
स्यात् यागोपि वा देवतां तत्र युक्तः स्यात् तेनाग्न्यादिवचनस्य मंत्रस्य सामर्थ्यं निश्चीयेत॥ न त्वेतन्नास्ति तस्माद्योग्यतास्तीति सवि
हितो विनियोगः। न च द्वितीयांतस्य देवताविधौ सामर्थ्यं लभ्यते॥ मंत्रवर्णाद्देवताविधिरिति च नागसादेवताविधाश्रयणे
मंत्रे चाज्यभागादिषु यस्मामाण्णा देवता यथाक्रमेण कीर्त्यमानाः प्रत्यभिज्ञायंत इति तासां स्मरणं दृष्टमेव प्रयोजनमिति नादृष्ट।

शा॰ १० र्थकल्पनात्तस्माद्विकृतिषु सौर्यादिष्वाज्यादिपदार्थत्वान्निवर्त्तते। तथाज्यभागाग्निरपीति चेत् दर्शपूर्णमासयो
६ राज्यभागौ प्रकृतस्य श्रूयते आज्यभागावग्नीषोमाभ्यां यजतीति योयमाग्नेय आज्यभागः स किं प्रधानदेवतायाः अग्नेः सं
प्रत्याभिता वत्ताहष्टा पत्तीभेसध: स्कारः उतारादुपकारकः तत्र निपूर्वेण न्यायेन संस्कारत्वे प्राप्त उच्यते। निगदेषा वाहनादिषु अग्निमावह सोममावह अग्नि
मावह इत्येवमग्निशब्दस्य द्विः पाठाद्देवतान्तरं गम्यते। सोमाच्च पूर्वं पठ्यमानोग्निस्ततः परभाविनः प्रधानाग्नेरन्य इति गम्य
ते। विधिवाक्ये चाग्नीषोमाभ्यां यजतीति एकेन पदेनाग्निः सोमश्च विधीयते॥ तत्र स्पष्टमेव यागं प्रति गुणत्वं सोमस्य अ
न्यत्र देवतात्वाभावात्॥ तथा अग्निः प्रधानं स्यात् ततो वैरूप्यं स्यात् सोमापेक्षयाज्यभागावित्युपदिष्टाग्नीषोमाभ्यामिति रूपा
देघं अग्न्यपेक्षया न हि परीतमिति वचनव्यक्तिभेदात्॥ तस्मादग्निरपि यागांगत्वेन विधीयते। यागस्तु प्रधानकर्म्मारा
दुपकारकः॥ तेन सौर्यादिषु नाग्निर्निवर्त्तते॥ अग्नीषोमीयादिविकारेष्वप्याग्नेयाज्यभागो निदिश्यते पशावपीति चे राम॰
तत्र अग्नीषोमीये पशौ पशुपुरोडाशः॥ अग्नीषोमीयस्य वपायाः प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति। स किं प ६

शोरारादुपकारकः उत पशुदेवतासंस्कार इति संदेहे। पशौ पुरोडाशे चोभयत्रापि न हि तन्निर्देशाद्विशेषणभूता देवता गुण
त्वेन गम्यते। न च गम्यते विशेषः पशोर्देवताङ्गं पुरोडाशे विपरीतमिति॥ उभयत्राप्यपूर्वैव देवतोपादीयत इति न संस्का
रत्वं। आसोमं वहं सग्निनामतिति ष्टंनीतिवाक्यशेषात् तत्र नासोमः प्रणीयमानो ग्निश्च पशौ देवता पुरोडाशे तु न नियोगत
स्तावेवेति प्रमाणमस्ति। तस्मादारादुपकारकः पशुपुरोडाशः। नैवं॥ दृष्टे स्मरणसंस्कारे सति नादृष्टकल्पना। पशुधर्मै
श्च संदंशात् तदङ्गत्वं सुनिश्चितं। ज्योतिष्टोमाङ्गं हि पशुर्न पुरोडाशदेवतासंस्कारार्थत्वेन शक्यः शंकितुं। पुरोडाशास्तु पशु
धर्म्ममध्ये विधीयमानः तदङ्गं सन् तद्गतदेवतासंस्कारेणादृष्टेनोपकुर्वन्नादृष्टार्थतामालम्बते। अतो नागत्यमाणविशेष
त्वं। तेन यैव पशोर्देवता सा नावाप्यावासे व पुरोडाशेन संस्कर्त्तव्येति विकृतिषु देवतान्तरवती पग्नीषोमौ निवर्त्तेते चतुर्हवि
र्विकारः स्यादिज्यासंयोगात् सोयं चरुं निर्वपेदिति अत्र संशयः। किं स्थालीवदवनश्च रुशब्दः उतौदनवचन इति। यद्यपि स्थाली
वचनः तदा किं स्थालीकपालविकारो हविः अपणार्था उत पुरोडाशस्य हविषो विकारः प्रहेयेति तत्र स्थाल्यां लोकप्रसिद्धस्तद

श्रा.१० वचनत्वंयस्तुपात्निकानामोदनेप्रयोगः सस्थालीसंबंधाद्गत्वाह्रगीकः। नवविपरीतंसंभवति॥ ओदनमात्रेप्रयोगाभावादेव।
७ येपितस्यौदनवचनत्वंमन्यंतेतेपिनतन्मात्रवचनत्वमाहुः कपालेकदाहेचाश्रयितस्यौदनस्यतद्वाच्यत्वानभ्युपगमात्॥ त
याचोपरितनेधिकरणेवक्ष्यामः। तेनस्थालीसंबंधनिमित्तएवौदनेपिचरुशब्दः निर्विशेषणत्वात्स्थाल्येवाभिधेया
साचानदनीयाहविष्ट्वायोग्याश्रपणयोग्यतानुप्रसिद्धेव॥ तस्मात्स्थालीवचरुः कपालविकारश्चसौर्यमितिस्थालींश्रपित
सहविषःसूर्यसंबंधात्स्थाल्येवाभिधीयते। तस्माद्यमितिनद्विनोभविष्यतीत्येकःपक्षः। गृह्णीमएवनस्थालीचरुरिति। स
तुहविर्विकारः। सौर्यमितिदेवतासंयोगात्। देवतानद्विनोह्यपंश्रमपायागएवायंनस्यात्वचनाच्चानदनीयेनापिकल
लादिनेवयागःक्रियेत तस्माद्धविर्विकारइतिद्वितीयः॥ ससंचरुर्हविर्विकारः ननुस्थाल्यांचरुशब्दः किंतुओदने। चरुशब्दस्य
वैदेयांत्रिकप्रयोगेचौदनवचनत्वावधारणात्। वेदेनावहादितःपांपत्नीपश्चतुरसुत्काअदितिमौदनेनेतिपश्चादनुवा
दादोदनवचनत्वंनत्वनावद्धाकेवगम्यतइत्युक्तंस्थालीनिमित्तत्वादितिसत्त्रननश्यानेकार्थत्वमन्याय्यमितिसर्वत्रैवो राम

दनवचनत्वं यात्त्रिकाश्चानवस्थाविनानं तत्परपक्षोदनेचरुशब्दमुपचरंति तेनेषां चशब्दैकगम्यधर्मव्यवहारिणां शब्दार्थविप्लवेन (धर्म)
सर्वा निश्चयास्थगजनेप्यः प्रसक्तेन नरवास एव शब्दार्थः। पाकविशेषनिमित्तश्चौदनेचरुशब्दः। न च स्थालीमंतरेण स पाको
निर्वर्तन इति कृत्वा स्थाल्यादरः। ननु नाव नास्थालीवचनत्वं तस्मादोदनेन हविर्विक्रियते सकपालेष्वक्रस्यास्यादन्यस्मिन्नाश्रुत
वान्॥ स एष चरुः किं कपालेषु कर्तव्यः उत यत्रक्वचन उत स्थाल्यामिति संशयः॥ चोदकप्राप्तेः कपाले स्यात्। न तस्य तत्परिछि
न्नं कपालं चोदकेन प्राप्नोतीति न च चरुरष्टसु कपालेषु शक्यः पक्तुं। स समष्टत्वं प्राप्य नेनत्वसंभवान्निवर्त्तते। ननु तन्निवृत्ता कपाल
मपि निवर्तितुमर्हति तस्मात्कपाले स्यात्। नैवं। अप्राकृतकार्यत्वात्। प्रकृतौ हि कपालगतेनोष्मणा हविः पाको निर्वर्त्तते। चरुस्तू
दकगतेनोष्मणा पक्तव्यः। न च कपालमुदकधारणार्थमुपादीयमानम प्राकृतकार्यं स्यादिति न चोदकानुग्रहः॥ तस्माद्यत्र क्वचि
त्क्रियत इति प्राप्ते ब्रूमः। स्थाल्यामेव स्यात्॥ तस्यां हि चरुत्वनिमित्तः पाको निर्वर्त्यते नान्यत्र तस्मात्स्थाल्यां स्यात्। यथोदनवच
नेपि चरुशब्दे स्थाल्यामेव पाकः ततः पूर्वाधिकरणे स्थालीकपालविकार इति पक्षस्य उदनेन हविर्विक्रियत इति पक्षस्य चकोनुष्ठा

रा० १० नेविशेषः उभयथापि स्थाल्यां पक्वस्य हविष्ट्वादिसाध्यत्वं कान्तस्मिन्विशेषणमनर्थलोपात्स्यादिसादिभिः स्वतन्त्रमनुष्ठाने स्यात्साहि यो
८ कपाले निर्वर्तितेपि चोदकप्राप्तः पुरोडाशस्य स्थाल्यां श्रपितो हविः स्यात्॥ ननु श्रपेषणसंपवनोपधानादीनि कर्त्तव्यानि स्युः
सिद्धान्तस्तु तेनेतेषामर्थलोपादकरणं एवं प्रयोजनसूत्राणि व्याख्याय पुनरधिकरणान्तरत्वेन व्याख्यानवान्। यो नाम चरावपि स्व्या
संभवादवघातवत्पेषणादीनि कर्त्तव्यानीति मन्यते तेन स्वबुद्धिमर्मन्दविषन्यायेन व्यावर्त्यते। प्रयोजनप्रयुक्तत्वात्तेषां चरौ च नर
भावादकरणं पेषणसंयवनोपधानादीनां। उपधानं तु याज्ञिकाः कपालोपधानकाले तेनैव मन्त्रेण स्थाल्याः कुर्वते। न च स्थाली
कपालकार्यं वर्त्तते उदकधारणार्थत्वात्। अतउपधानस्यापि सामान्यासादनमप्यर्थलुप्तत्वात् चोदकेन प्राप्यते॥ इति शास्त्र
दीपिकायां दशमस्य प्रथमः पादः॥ कृष्णले पर्थलोपापरेकः स्यात्। प्राजापत्यं घृते च रुं निर्वपेच्छतं कृष्णलमायुः कामः इत्यत्र
संशयः। किं कृष्णलेषु पाकः कर्त्तव्यो नेति तु सार्थत्वादकर्त्तव्यः। ननु घृते श्रपयतीति वचनात्कर्त्तव्य॥ न श्रपशक्यत्वात्रूपरसादी
नां पूर्वेषां तिरोभावो पूर्वाणां च प्रादुर्भावः पाकः। असौ न कृष्णलेषु संभवतीति तस्मादकर्त्तव्यः। इति प्राप्ते ब्रूमः। यद्यपि मुख्यः पाको राम
८

नसंभवति तथापि लक्षणया तापमात्रं वचनेन विधीयते अनस्तावन्मात्रं कर्तव्यं अन्यथा वचनानर्थक्यं स्यात्। यदि त्वयमेव मुख्यः
पाको यदनुलक्ष्य श्रीहव्यस्यो ल्लीकरणं ततः सुतरां वचनवलाद्रसस्यापि प्राप्तत्वेनकार्यैक कर्तव्यः। उपस्तरणाभिघारणयोरप्रत्तार्थ
त्वादकर्मस्यात्। हृत्स्नलवदात्रेव संशयः किमुपस्तरणाभिघारणे कर्तव्ये नेति। चोदक प्राप्तेः कर्तव्ये नैव तदुपस्तरणाभिघारयति स
अप्रत्ताहुतिमेवैतां करोतीति वचनात् स्वादिमार्थेन नवल्लस्नलेषु स्वादिमासंभवति अतो लुप्तार्थत्वादकर्तव्ये इति चेत्। नप्र
स्वाद स्वार्थवादमप्रत्ताहुतिवचनस्य। एवं नहिं चतुरवत्तसंपत्त्यर्थमुपस्तरणाभिघारणे न तु चत्वारि चत्वारि क्लस्नलान्यवघ्नति चतुरवत्ता
६९ स्यास्यादिति हृत्स्नलचतुष्केनैव चतुरवत्तावाप्तिवचनादकर्तव्यं नैवं। नहि क्लस्नलचतुष्कनावदानचतुष्कमाद्युं कं श्राकं विषयभेदा
त्। आप्तिवचनं तत्वर्थवादमात्रं यदि क्लस्नलचतुष्केनैव चतुरवत्तमाप्येत। ततः सकृदवत्ते नैव द्व्यवदानमपि स्यात्। तत्र
चत्वारि चत्वारीति वीप्सानावकल्प्येत। अथ वीप्सार्थो विधीयते। ततः प्राप्तावदानानुवादेन चतुःसंख्याया वीप्सा पाश्च विधा
नाद्दास्कं भिये त। ननु द्विर्हविषो वघ्नतीत्यस्य मकृतिततः प्राप्ते द्व्यवदानं स्यात् अवत्तसंपत्त्यर्थं हि प्रक्रमो द्व्यवदानमुपस्तरणाभि
नचतु।

शा० १० घारणवत् तद्वि हन्यतः संपन्नं ननोद्युवदानमप्युपस्तरणाभिघारणवदेव निवर्तितुमर्हति तस्माद् यद्वाहमात्रमाप्लिव
९ रत्ना भिघारणमितिकर्तव्यमुपस्तरणं मितिप्राप्त उच्यते। स्रुक्ष्माणां पुरोडाशावयवानां तु च संसक्तानामाहवनीययानः कथं स्या
दिसेवमुपस्तरणाभिघारणं दृष्टार्थं न त्वक्षतखलानां संसक्तिः संभवति। परिहारार्थोपस्तरणादि भवेत्। ननु चतुरवत्त
संपत्तिरपि दृष्टमेव प्रयोजनं। न। अनंगत्वाच्चतुरवत्तं जुहोतीसत्राव न तं जुहोतीत्येनाव दिधीयते चतुः शब्दश्च उपस्त
रणाभिघारणद्युवदानवचनप्राप्तचतुःसंख्यानुवादमात्रं न विधानार्थं प्रवत्तहोमविधिपरत्वाद्वाक्यस्य तस्मादकर्तव्यमुपस्त
रणाभिधारणं। भक्षाणां तु भी सर्वत्वादकर्मस्यात् क्षत्वाचि तेषां यत्र प्रक्षेपोभक्षणाः पुरुषप्रीत्यर्थाः न वा क्षतखलानामस्ति भक्षो
ने ति। नत्र क्षतखलैर्भक्षमाणैर्न प्रीतिर्भवतीति तेन प्राक्षनात्वाद्वक्ष्यमाणतु प्रार्थत्वादकर्तव्याः। प्रतु वचनं तु इक्षुकारं भक्षयन्ती
ति न दाशस्य भक्षणं विधत्ते न स्याद्दनीयत्वात् तु इक्षुकारस्यानुवादसंभवात्तु। न क्षतखलानां। तस्मान्न तेषां भक्षतिमासेन्न रम०
मः। पूर्ववाक्ये क्षतखलानां प्राधान्याद्दाशस्य च न दंग त्वात्तेषामेव भक्षणवाक्ये त्वपः। तेषां चानदनीयानामपि प्रदानवत् भक्षणम ९

पिवचनाद्विप्रतीति तेषामेव छूषाकरणविशिष्टं भक्षणं विधीयते। एकधोपहारे सहत्वं ब्रह्मन् भक्षाणां प्रवृत्तौ वितन्वन् नत्वान्य।
तत्रैव श्रूयते। एकधा ब्रह्मण उपहरतीति। किमत्र सकृत्त्वं सहत्वं वा विधीयते उत सहत्वमिति। कस्यात्र विशेषः। यदि सकृत्त्वं वि
धीयते। तत ऋग्वेदकप्राप्तानामिडाप्राशित्रचतुर्द्धाकरणसंयुवाककालभक्षाणां कालभेदे न चतुर्हरणप्रासे सकृद्धरतिनाधि
कमिति विधानादेक एवास्य भक्षस्तु उपहर्तव्यः। भक्षान्तराणि निवर्तेरन्। सहत्वविधौ पुनरनिवर्तिता भक्षाः कालभेदेनोपहर्त्त
व्याः। प्राप्ताः संतु एकस्मिन्काल उपक्षिप्यन्ते। तत्र सकृत्त्वे सहत्वे चैकधाशब्दस्य लोके प्रयोगादनियमः। यत एवायं साधारणः श्रु
त एव चोदकप्राप्तभक्षान् एवाध्याय सहत्वमेव विधीयते प्राशित्रमिडामिति द्वितीया पाक्षिकी प्रतिभक्षस्य प्राधान्यावगमाद्दृ
ष्टार्थत्वाच्च न स्यतिपद्यर्थाः प्राकृता भक्षाः कृत्स्नेष्वपि चोदकेन प्राप्नुवन्ति तेषां सहत्वविधानमुपपद्यते। सर्वत्वं च तेषा इत
प्र[illegible]यच्छति मधिकारात्स्यात्। तत्रैव सर्वं ब्रह्मणे परिहरन्तीति। श्रुतं। तत्र संशयः। किं ब्रह्मभागस्य सर्वस्य परिहाराय विधीयते। यद्ब्रह्मणो
सर्वं तत्परिहरन्तीति यत्र ब्रह्मणे परिहरन्ति तत्र सर्वमिति वा। उत परिहरणीयस्य सर्वस्य ब्रह्मसंबन्धो विधीयते यत्परिहर

श्रा॰ १० नितत्सर्वं ब्रह्मणो नाध्वर्य्वादिभ्यस्तेभ्य इति पुरुषांतरेभ्यो भक्षोपनीयत इति। तत्र चोदकप्राप्तपुरुषांतरसंबंधो माबाधीति
१० ब्रह्मभागस्य परिहर्तव्यस्य सर्वस्य ब्रह्मन्संबंधिनोऽपि परिहारो विधीयत इति मन्यते वचनं चैवमनर्थकं स्यात्। प्रकृतितरा एव हि
कृत्स्नस्य ब्रह्मभागस्य भक्षणाय परिहरणं प्राप्तमेव तत्र कृत्स्नो हि भागस्तेन भक्षयितव्यः। अन्यथा ह्यभुक्तिनस्यां शास्त्रसंस्कारहतिः
स्यात्। तस्मात्प्राप्तत्वाद्ब्रह्मभागस्य कृत्स्नतानविधातव्या। तेनपत्यस्य कृतौ नानापुरुषेभ्यो भक्षार्थं हरति हि ~~तेभ्यो भक्षार्थं ह~~
न तत्सर्वं ब्रह्मणे परिहरति नान्येभ्य इति प्राकृता भक्षाः पुरुषांतरेभ्योपनीयन्ते पुरुषापनयनात्स्वकालत्वं। सर्वे भक्षा ब्रह्मण उपह
र्तव्यास्ते च एकधा ब्रह्मण उपहरतीति सहत्वविधानादेकस्मिन्नेव काल उपहर्तव्या इति स्मिन्ने संशयः। पुरुषिंग पृथुपहृतानां युग
पद्ग्रहणं उत प्रकृतिवन्नानाकालं भक्षणम्। तत्र। भक्षार्थो ह्युपहारो नो भक्षोऽपि युगपद्भवेत्। सहाप्युपहृतो शाक्यं यथाकालं तु भ
क्षणं॥ तस्माच्चोदकाबाधापसहोपहृतानामपि प्रकृतिवन्नानाकालं भक्षणं। ।एकार्थत्वादविभागः स्यात्। ।प्रकृतौ चतुर्द्धाकरणं राम॰
विधायेदं ब्रह्मण इदं होतुरित्यादि व्यादेशो विहितः। स किं कृत्स्नेष्वपि कर्तव्यो नेति। चोदकप्राप्तेः कर्तव्यः। नैवं। चतुर्द्धाकरणं नाव १०

च्चेतुर्णांभक्षणार्थं प्रक्षेनोऽस्ति तु ब्रह्मलोके वसर्वं भक्षयितव्यमितितु स्वार्थत्वात्कर्त्तव्यो व्याहरेऽपि वस्तुर्णो यव छार्थंऽह तु सर्वस्मिन्
न्नसंबंधित्वेन निश्चितत्वादिदं ब्रह्मणाऽस्यपि निर्दिष्टेन न कर्त्तव्यः। ननु रामिदं होतुरित्यादिभ्यो यनीनत्वात्। अग्निह्यदानं धर्ममात्रं स्यात्तद
ष्टातिसामर्थ्यात्। ऋत्विग्भ्योरक्षिणां दद्यादित्यादि यदृत्विग्दानं तदृष्टार्थमानत्यर्थं वेति संदेहे। अदृष्टार्थमिति ब्रूमः। दानं कर्त्तव्य
ताऽन्यथा दाने नानतिकर्त्तव्यनावा(च्चा)सानचतुर्वेलं। तस्माद्दानमात्रं कर्त्तव्यं किंच द्वादशशतादिपरिमाणनियमो मंत्रादीतिकर्त्तव्यता
कर्मानन्तुरूपद्रव्यताचदानस्यादृष्टार्थत्वे वकल्पतेनान्यथा। कर्मकरेभ्यस्तु क्रीयमानमपेक्षितानतिहारेण दृष्टप्रयोजनवत्वात्र
शक्यमदृष्टार्थं कल्पयितुं तु परिमाणादिनियमस्तु काम भवतु दृष्टार्थः ननु नाव नादानस्याथ दृष्टार्थता तस्मात्तेषु न कर्त्त
व्यं दानं। शेषभक्षास्तद्वत्। शेषभक्षा इडादिविषया दर्शपूर्णमासयोः सोमविषयाश्च सोमे समाम्नाताः किं परिक्रयार्था
उत प्रतिपत्त्यर्था इति विचारः। तत्र भक्षणात्प्रीतिः प्रीत्यावानतिः प्रसक्ता तस्मात्तदर्थाः। नैवं। यागेन हि नेवशिष्टं द्रव्यं प्रति प्रतिपत्तिमपे
क्षमाणं भक्षणेन प्रतियाघनेन तु दृष्टमेव प्रयोजनं। अनीशानश्च यजमानो देवताये संकल्पितस्य। अनेन शक्यो स शेषो नेन

शा० १० परिक्रेतुं। तस्मात्प्रतिपत्त्यर्था भक्षाः। स्थिते चास्मिन्भक्षाणां प्रतिपत्त्यर्थत्वे चतुर्धाकरणे भक्षणात्परिक्रयमाशंक्य भक्षणार्थ
११ तायाद्रेश्चास्यात्तनीयेसाधितात्तस्मात्सत्रेष्वबाध्या भक्षाः वरणमृत्विजामेमानं मन्निर्हेतात्मनमनार्थत्वात्सत्रेनस्या
त्सत्वकर्मत्वात्। ज्योतिष्टोमे वरणमृत्विजां होतेत्यादि। तत्सत्रेषु कर्तव्यं नेति संशये व्योरकानुग्रहाय कर्तव्यं। ऋत्विक्कार्यवे
हं मकृतौ न त्वसंत्रेपि यजमाने स्वाधानव्यं। ये यजमानास्त ऋत्विज इति वचनात्। अतो लुप्तार्थत्वात्कर्तव्यं वरणं नैवं। रा। आन
र्थक्यं न सप्रकृतौ कृतं। न चात्र यजमानैर्वरणेनानमितव्यं। अतो र्थलोपात्र कर्तव्यं। ऋत्विक्त्वमपि यागकर्तृत्वं न च प्रकृ
तौ वरणविधानात्तद्द्वारेण तत्तानामेव सत्रेषु तु वरणस्यार्थलोपान्निवृत्त वरणानामेव न विगुणमृत्विक्त्वं अघर्यादि
त्वं च भविष्यति। पदितुकर्मकरवचनोपमृत्विकृशब्दः। ततो वरणेनापि यजमानेष्वृत्विक्त्वमाधातुं। ते हि स्वार्थं कुर्वाणाः न कर्म
करा भवंतीति तेनात्विग्भिरेव सत्रं कर्तव्यमिति वरणनिवृत्तिः परिक्रयश्च नार्थ्यात्तद्दक्षिणाद्दानं परिक्रयार्थं नार्थत्वमिसु राम
कं। इदानीं परिक्रय एव सत्रे किं कर्तव्यो नेति संशये। पूर्वाधिकरणवत्पूर्वोत्तरयत्सौरैः। नात्र गौदीयन इत्यादि प्रतिषेधो नासत्सां ११

दानप्राप्तौ प्रहतेनेतस्मादहनिद्वत्तंदानमिति विशेषाशंका। विध्यंतरशेषत्वमनुवादेन प्राप्तिंसूचयति। तस्माद्दानमनार्थ
वादेण वत्सरिक्रयो निवर्त्तते। उदवसानीयः सत्रधर्मो नह्यंगत्वात्तद्दानंधर्ममात्रंस्यात्। सत्रादुदवसाय पृष्ठशमनीयेनज्योति
ष्टोमेन सहस्रदक्षिणेन यजेरन्निति श्रूयते। तत्र संशयः। किं पृष्ठशमनीयः सत्रांगं तत्र च सत्रयजमानैरेवाहीअं कर्त्त
व्यमिति दक्षिणादानमदृष्टार्थं। उत नांगमुत्तरभिः कर्त्तव्यं परिक्रयार्थंच दानमिति। अनंतरफलवत्त्वात्समभिव्याहाराच्च तदु
त्तरकालेपि श्रूयमाणः पृष्ठशमनीयो वाजपेयस्येव बृहस्पतिसवः सत्रस्यांगं। इतरथा हि सत्रसंयोगः काललक्षणार्थः स्यात्
फलं च कल्पेत। तस्मादंगं। नैवं। उदवसानं हि सागः। स च निःशेषसमाप्तावेव कल्पते। न च निःशेषसमाप्तस्यांगं संभवति वाजपेये
नेष्ट्वेति तु प्रयोगसमाप्तिर्गम्यते। समाप्तेपि च यथोक्तप्रयोगे संभवत्यंगांतरं। सत्रस्य तु पुनरंगं सन्न भवति संभवे वा सागो
न स्यात्। तस्मादुदवसाये निस्सागस्य शाद्वादनंगत्वं। न च लक्षणार्थो नमेव सत्रावसानं निमित्तीकृत्य पृष्ठशमनीयविधा
नात्तेषां तु वचनात्। तेषां तु वचनाद्विपत्ववत्सह प्रयोगः स्यात्। पृष्ठसंवनीयएव संशयः। किमुदवसायिभिः संहत्य प्रयोक्तव्यः।

शा॰ १० उतैकैकत्र्येन यजेरन्निति। तत्राख्यातोपात्तस्य बहुत्वस्योपादेयकर्तृगामित्वेन विवक्षितत्वात्संहत्य कुर्युरिति सिद्धं तं तावद् पर्य
१२ वसितं। अथ तत्रापि चिन्तान्तरं प्रक्रियते तत्राम्नातर्त्विजो वृणीरन्। यदा संहत्य कर्तव्यं तदा किं यजमानैरेव कर्तव्यं उत ऋत्विग्भिरि
ति विचारः। तत्रोदवसाने यजमानानामेव कर्तृत्वात् कामप्रसयेन वषट्कारमनीयस्य तत्समानकर्तृकत्वात् तत्रापि यजमा
ना एव कर्तारो नान्य इति प्राप्ते ब्रूमः। यजेरन्निति सत्तेन यथाव्यापारो विधीयते तेन तस्यैवोदवसानसमानकर्तृकत्वात्कामप्रसपादव
गम्यते नार्त्विजस्य। ननु पुरुषान्तरैः प्रकृतिवत्क्रियमाणं न केनचित् विरुध्यते। किं च दक्षिणा शब्दः परिक्रयार्थे सा वर्जत्वेन चा
त्र परिक्रयः संभवति अतो दक्षिणाश्रुति व्यर्थमेव भवेयुः। यद्येवं अंगत्वेपि दक्षिणाश्रुतेरेवान्यसिध्येयुः। ये यजमानास्त ऋ
त्विज इति साधारणं वचनं प्रष्टव्यामनीयवर्जं भविष्यति तत्राह सपरिक्रयवचनात् भवतु नामैवं को दोषः। किमर्थं तत्सां
गत्व निराकरणं क्रियते। अंगत्वाभ्युपगमे नापि शक्यत एव परिक्रयार्थं नावक्तुं। तथापि तत्वत उत्तरं विवक्षित्वा अंगत्वमेव
नास्तीत्युक्तं। अपि चांगत्वे सति संहत्य प्रयोगः स्यात् प्रधानवत्। एकैकशास्त्र प्रयोगं वृत्तुकामो गत्वं निराकृतवान्। तस्मादन्ये राम॰ १२

वरीतयाः। ।स्यिनाद्युत्तरं नैतदस्ति। संहत्य प्रयोगः इति। यदि बहुत्वं विधीयेत न तत्सर्वं स्यात् उदवसायेति तु त्काभस
याद्युदवसानसमानकर्तृकत्वावगमाद्युदवसाने च बहूनां कर्तृत्वात्समेव बहुत्वं न विधीयते। न चाविहितमंगं संभवति। उ
दवसाने च गम्यमानमपि बहुत्वं निमित्तत्वदुद्देश्यगतत्वात् विवक्षितं। यागे चानुवादेनांगं। किंच। उदवसाने निरपेक्षाः कर्त्ता त्वाद
रः न यदि यागेपि निरपेक्षाः ततः समानकर्तृकत्वं संभवेत नान्यथा तस्मादेकैकश्येन प्रयुंजीरन्। कामेष्टेभ्य इत्यनन्तरमाह्नान्। सा
रस्वतेस्से रयचे [redacted] ह्वाक्षंभरत्रवणं मा प्याग्नयेकामाया अष्टाकपालं निर्वपंति। तस्मा मथ्यांच पुरुषीच धेनुके रघु रिति।
कि मिदं दानमदृष्टार्थमुत परिक्रयार्थमिति। तत्र ष्टं विंशतेः। किमेतस्मान्न्यविजः संति तु तयजमानैरेवेपमिष्टिः कर्तव्येति। त
त्र ह्याह त्रा हे ये यजमानास्तत्र ऋत्विजमानामार्त्वि ज्यमिहातिरेशेन प्राप्यमाणं प्राकृतेष्वंगेषु प्राप्यते नापूर्वांगेषु यूर्वं यो
ट स्तरणं बर्हिः स्थितं बर्हिर्दर्भाः। तेनापूर्वांगेक्षामेष्टेः स्वसतियजमानार्त्विज्ये चारकमाप्तेः ऋत्विग्लिभिर्भवितव्यं। सत्सु चैतेषु दानम
सत्स्वपि दक्षिणाद्दृष्टार्थतापरिक्रयार्थमेवेति प्राप्ते ब्रूमः। प्रस्तरो बर्हिर्दर्भाः प्रदिष्टानां पदार्थानामंगत्वाप्युक्तं यर दर्भेषु

श्रा.१० नभवं नियजमानास्तु कर्त्तारः प्रयोगांगत्वात् विहृनाव पिप्रयोगद्वारेणाप्नुवंति। तस्मिंश्च प्रयोगे यदपूर्वमप्यंगं निपतति
तत्तैरेव प्रसंगसिद्धत्वान्न कर्त्तुं नरमाकांक्षति। तस्माददृष्टार्थमेव तद्दानं द्वयोश्चाचोदितयः स्यात्। दर्शपूर्णमासयोः श्रपते नादक्षिणा प्र
१२ परियत्नी संयाजयत्कपालमभिजुहुयात्। वैश्वानरं द्वादशकपालं निर्वपेत्तस्यैकहायनीगौर्दक्षिणानां द्वेष्यापरघ्यादिति
।किमिदं दानं परिक्रयार्थमुतादृष्टार्थमिति। दक्षिणाशब्दात्परिक्रयार्थमिति। यद्यपि च दर्शपूर्णमासयोरेव नैमित्तिकं मंगं वैश्वा
13 नरेष्टिस्तत्र मध्यएव त्क्रिपतेन तथापि वचनाद्दक्षिणांत्तरं नानुपपन्नं तुच्यते। द्वेष्याय तद्दानं न च ऋत्विग्विष्यः संभवति। आर्त्वि
गावार्यै नानि चरितस्या विति स्मरणात् (प्रवरणात्)। तस्मादनृत्विजे दानमिदमदृष्टार्थे। दक्षिणाशब्दश्च दानमात्रेगुणसावर्तते। ।
।अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नां ।इदं श्रूयते परिसवाय संदीक्षितानां प्रमीयते तं दग्ध्वास्थ
स्माजिने कनिष्ठस्यात् स्थिसुपनह्य योस्य नेदिष्ठः स्यात् तं तस्यस्थाने दीक्षयित्वा तेनसह यजेरन्। ततः संवत्सरेऽस्थीनि राम.
याजयेयुरितियो यं संवत्सरेऽस्थियागः स एव विचार्यते। किमस्थिशब्देन शरीरशरीरिणोरभेदोपचारेण मृतं लक्षयित्वा तस्या १२

यंयागउच्यतेनेरनरधिकारेचयागेसन्निपातामितरेषां मत्विक्संस्कारणीयानांकर्तृत्वमात्रेउनाच्छिद्यतेन जीवनएव सन्नि
णोस्तिष्ठ सहायास्तस्मिन्पित्रानेषामेव यागविधिरिति। नत्वाच्छिद्राद्दस्य तच्छरीरेपुंसिमृत्वे तेरितरेषां चरापन्नत्वपरस्मैप
दनिर्देशात्परार्थे कर्मणियाजयितृत्वावगमात्तन्नाधिकारमिदं कर्मसत्रमध्यमरणनिमित्तं तथैवफलमिदमितिपा
सेन्नमः। नकथंचिदपिमृतस्यसाक्षात्संनिधौ ह्यात्वं संभवति न चाकर्तुरधिकारः तस्माज्जीवनामेव यागः याजयति
श्चयेनेषांयाजयितारस्तदभिप्रायेणभविष्यति। यदितु वचनात्तेषां जायसंस्कारमर्थंतु संसेष्टिनदर्यच्चात्। ।जीवद
धिकारयसेचोदकमासंनकिंविद्धाधिनयांमृतनाधिकारेतु भवतिकेषोविद्याधः नदिहकृत्वाचिंतयाकिंबाध्यंकिंनेतिचिंसते।
येयजमानजयाः वपनादयश्चसंस्कारादीक्षणीयेष्टिश्चनेकिमस्यधिकार पक्षेकर्तव्यानेति। चोदकानुग्रहायकर्तव्याः।नै
वं।दीक्षार्थाहीष्टिर्यमनियमसंकल्पश्चदीक्षानचासोमृतस्यसंभवन्तितस्माद्दीक्षार्थावपनंतु हरापास्तंकेशश्मश्रूणो
रभावान्नजयश्चाशक्यत्वात्। कृत्वर्थंतुक्रियमाणेगुणभूतत्वात्। ।अथयपत्रयजमानोगुणभूतः यथाशुक्तं यजमानोत्वार शुक्कारस्यमहं

श्रा·१० भवनइत्सादैः। नकृत्रं थंनेति। अचेतनानामस्कुंत्स्वानंत्मलक्षणकर्तृत्वासंभवात्कर्त्तव्यं। ननु चेतनस्यापेक्षकर्तृत्वं काष्टादीनामपि
१८ ज्वलनादेः कर्तृत्वात्तपस्येवान्यानपेक्षसाख्यातोपात्तव्यापारसमवायसंभवः सष्टवकर्त्ता सस्याच्छुक्तान्वारंभणादिक
र्मास्विभिः कर्तव्यं काम्यानि तु न विधंनेकामात्मानाघथेतरस्यानुक्षमानानि गुणकामानां विकृतौ प्रवृत्तिं कृत्वात्विंस
ते। यदि कामयेत वर्षुकः पर्जन्यः स्यात्नीचैः सदोमिनुयादित्यादयो गुणकामाम्तनाधिकारपसे प्रवर्त्तनेनेति। चोद
कप्राप्तेप्रवर्जनेनैवं। कृतः कामाज्ञानात्। नहीदंहीदंत्वापनेकिंमतस्येष्टमेवेति। तस्मादप्रवृत्तिगुणकामानां। ईहा
यीश्वाभावात्सूक्तवाकवत्। सूक्तवाकगतनाम्यायुराशास्तइत्यादीनि वलयहामिफलयद्दानि प्रवर्त्तनेनेति संज्ञावे।
सूक्तवाकस्य प्रहरणांगतयानि सर्वत्र प्रवृत्तेस्तन्निबंधनामायुरादीयद्दानामपि प्रवृत्तिः नैवं फलनिर्देशाद्येनेमांत्र
वर्णिकफलकल्पनात्। नचमतस्य फलाशंसनंगम्यतस्सुकं अतोलुप्तार्थवादेष्वांनिवृत्तिस्सुवहोत्कामाः प्रकृ राम
तौसंतिहोतृकामाः। यंकामयेतपापीयान्स्यादितिनीचैस्तरांतस्ययाज्यपा — — वषट्कुर्यात्। यंकामयेतवसीयान्स्या १८

दिनिउच्चैस्तरां न स्पयाज्यपावषट् कुर्यादित्यादयः। नेमत्ताधिकारेपि कर्मणि हेतुः कामनासंभवान्न निवर्तेरन्। निवर्तेरन्स्वा
यजमानफलमेव बहुत्रापि निर्दिश्यते नेन चानिष्टं फलं भवति। न च मृतस्येच्छा विज्ञायते नस्मादेवमादीनामपि निवृत्तिः।
सर्वस्वारस्यादिष्ट गतो समापनं न विघ्नेन कर्मणो जीवसंयोगात्। सर्वस्वारो नामैकाहः स्वर्गकामस्य विहितः। तत्रार्भवस्तो
त्रकाले ब्राह्मणाः समापयत मे यज्ञमिति प्रैषमुक्तिगम्यः प्रहाय यजमानोग्निं पते। तस्मिंस्तु नेकर्मशेषं समापनीयं नेति
संशये। न समाप्यं तस्य कर्तृत्वासंभवात्। याजमानस्य नावत्सु समाप्तिः कर्तव्यायत्तत्व यजमानस्य कार्यं तदृत्विजः कुर्वन्ति
नान्यत्। तस्मादृत्विजोपि न समापयेयुः। उच्यते। यद्यसंभवि कर्तृत्वं न तत एवं भवेदिदं। जीवत्येव तु स प्रैषाच्छिष्टकर्तृत्व
मच्छति। वरणभरणादि समाचरणमेव जीवद्दवस्थायामपि यजमानस्य कर्तृत्वं। न च मरणोत्तरकालभाविन्यपि कर्म
शेषे जीवदवस्थायामिव संविधानेन संभवति। प्रसह्यमेव च समापयतेति प्रैषेणोपमासिश्चाधमानानशक्यापह्नो
तुं। नहि ब्राह्मणभागगतादृष्टेः प्रैषस्य वक्तृष्विदृष्टिदोषः। नहि प्रैषे प्रैषकपुरुषस्य स्थानं त्यं यन पोरुषेयत्वाद्दोषः स्यात्। प्रयो

श्रा॰ १० कृत्वमात्रेनुत्रासणगनेषित्वमैषेष्वपि पुरुषाणां। अतः प्रमस्तमेव विहितं समापनं स्वर्गएवात्र मरणेनार्थिनः फलं। अनम
१५ रणं मरणकामइतिश्रंगीकृत्य मरणइस्वर्पः। तेनयोप्येवं ह्यात्वा स्वर्गमाप्नवानीति कामयते तस्यायं क्रतुः। तथा च हरिस्मि
हृक्तं। प्रधानस्यमरणेनार्थिनइत्यवर्त्तयं नीति। तेन संजानेपि मरणे स्वर्गार्थमेव समापनीयं गतेक मोच्छियत्स्वत्। अथ
15 मतेयजमानेकर्मत्रोषेक्रियमाणे किंवा धर्मं किंवानेतिप्रश्नेनैवोपक्रमः। अत्रोत्तरं। अस्छिद्युपतेस्त्वामधिकारयमैर्थोक्तं नथे
हापिद्रष्टव्यं जीवस वचनमायुरात्रिप्रस्त्रदर्थत्वात्। सर्वस्वारएव मरणास्याग्जीवइवस्थायामायुराशास्त्रदस्यायुराशी
र्वक्तव्यानेविसंशयः। तत्रमरणाभ्युपगमेन प्रद्दतस्यनाशास्तिनव्यमायुः। प्रागपित्वार्भवकाल्लान्मरणसंभवात्तथा स
तिक्रतोर्वै गुणपाघावदार्भवकालमाशास्तिनव्यमायुः। तस्मात्तपुराशीर्वक्तव्या। ।क्रियास्यात्सूक्ष्मी मात्राणां। ।यत्राकृता
वानसर्थमत्विग्वरणंदक्षिणादानंचतत्सत्रेनस्यादित्युक्तं। पत्वदृष्टार्थमनुपाज्ञावरणा(या) अत्रेपहिरणपदानंचतत्सत्रे राम॰
पिकर्त्तव्यमितिभ्रष्टुदाहरणमात्रमेन तागुणलो येच मुख्यस्य दर्शपूर्णमासयोरग्निहोत्रहवणाहवींषि निर्वपतीति श्रुतो १५

निर्वापः पवमानेष्टिषु चोदकेन प्राप्तः कर्तव्यो नेति संशये। न कर्तव्यः। कस्मात्। अग्निहोत्रहवण्यभावात्। यथाग्निहोत्रं हुतं
साग्निहोत्रहवणी न च पवमानेष्टिवेलायामग्निहोत्रं हुतं संभवति विनाचाग्निहोत्रहवण्या निर्वापो विगुणत्वादकर्तव्य
इति प्राप्ते ब्रूमः। अनिर्देशेन हि कार्यमुखेन पदार्थेषु प्राप्यमाणेषु हविःसंस्कारार्थतया निर्वापः प्राप्यते न तदंगभूतमग्नि
होत्रहवण्यसंभवान्न प्राप्यते। न त्वाप्राप्तप्रागुणत्वं। अनन्तरभावेप्यविगुणत्वात्कर्तव्य एव निर्वापः। मुष्टित्वोपात्तसंख्या
लोपस्तु गुणत्वात्स्यात्। वाजपेये श्रूयते बार्हस्पत्यो नैवारः सप्तदशशरावः क्षीरे चरुर्भवतीति। अस्ति तु प्रकृतौ चतुरो मुष्टीन्नि
र्वपतीति चतुःसंख्यामुष्टिद्रव्यं च तदुभयमिह चोदकेन प्राप्तं न चतुर्भिर्मुष्टिभिः सप्तदशशरावपरिमाणश्चरुः संपादयितुं
शक्यते। अतो वश्यं बाधितव्ये सति किमुभयं बाधितव्यं शरावद्रव्येण मुष्टिद्रव्यं सप्तदशसंख्यया चतुःसंख्या किं वान्यतरत्।
तत्रापि किमनियमः अथवा मुष्टिग्रहः संख्यालोपः विपरीतं वेति तत्राविशेषादुभयोर्बाधः। तत्रापि समानकार्यत्वात् द्रव्यं
द्रव्येण संख्या संख्यया सेकः पक्षः। सप्तदशसंख्याशरावपरिमाणं च यागद्रव्यांगं चतुःसंख्या मुष्टिश्च निर्वापांगं। अतो नता

शा.१ वक्तास्यादेकविषयत्वं येनोभयपशुभयेन वा धेना। चतुर्भिर्मुष्टिभिः समस्तदशशाराराव चतुर्नसंपादयितुं शक्यते न इ समर्था ह्याधः।
९६ तत्रैकबाधेनोपपत्तौ नोभयबाधनं युक्तं। तस्मादन्यतरबाधः। तत्राविशेषादनियम इति द्वितीयः। संख्यायाद्व्यंगत्वात्स्य
16 धानस्य मुष्टिद्रव्यस्यानुग्रहः। संख्यायास्तु बाध इति तृतीयः। न संख्यायामुष्ट्यंगत्वं वाक्यलक्षणसमानाधिकरणाद्व्य
संबंधबाधेन हि तीयाश्रुता निर्वापांगत्वावगमादुभयोरपि निर्वापांगत्वावगमात्तुल्यत्वं। तत्र मुख्यत्वात् संख्यानुग्रहो जघ
न्यत्वाच्च मुष्टिलोप इति सिद्धांतः। औसत्तिके तु द्रव्यतो विकरः स्यात् कार्यत्वात्। धावापृथिव्यां धेनुमालभेत वायव्यं वत्स
मैंद्रमृषभमिति गोद्रव्यासाधारणगुणत्वं च मेषु धेन्वादिशब्देषु श्रुतेषु किं चोदकप्राप्तमजद्रव्यं प्रवर्त्तते नेति संशयः। उत
यद्यपि गोरसाधारणं गुणमेते वदंति तथापि न गोर्वाचकाः। तेनात्र गोर्नोपदेशेन नातिदेशेन प्राप्तिः॥ अजस्त्वतिदेशेन प्रा
प्यते। तत्रैव धेन्वादिशब्दा लक्षणया वर्त्तंते। यथाजमृषभमिसादिष्विति प्राप्ते ब्रूमः। नानुमानिकचोदकानुरोधेन श्रुतानां राम.
शब्दानां लक्षणावृत्तिर्योग्या प्राप्तानेन यद्यपि गोद्रव्यं प्रसक्तं श्रुतगुणविशेषविरोधान्न प्राप्यते तथापि तत्के तु कार्यत्वात्स्यात्कृ ९६
नष्टादं तथापि श्रुतानुरागविशेषसंपादनाय गौरेवात्र भक्ष्यः चोदकप्राप्तं त्वजद्रव्यं

तस्मात्तदापत्तेः यस्तु साधारणगुणवचनः श्वेतादिशब्दः वायव्यं श्वेतमालभेतेति स चोदकप्राप्तेष्वजेषु संभवतीति न तत्रा
जस्य बाधनमिति प्रत्युदाहरणमेतत् विमतनिषेधेन तद्वचनात्स्वकर्मगुणलोपः स्यात्तेन च कर्मसंयोगात्साधस्त्वस्याप्ययनेन ख
लेवाली यूपो भवतीति। तत्र संशयः किं चोदकप्राप्तखादिरादिकं यूपं छेदनादिभिः कृत्वा स खलेवाली कर्तव्यः यूपः खलेवा
ली भवतीति वचनव्यक्तिः उत यैषां तद्वैदिभूते खले पूर्वावस्थिता खादिर्यः खादिरी वा खलेवाली तस्यामेव पशुनियोजनं
कर्तव्यं। या खलेवाली स यूपो भवति यूपकार्यकरी भवतीति वचनव्यक्तिरिति तथा विज्ञायामि ष्टोऽस्य यनेन दधिमधु घृतं धा
नाउदकं तंडुलास्तन्तुः स्फ्यं प्राजापत्यमिति। तत्रापि चोदकप्राप्तानां व्रीहियोर्वघातादिभिस्तंडुलीकर्तव्याः उत व्रीहा अव्रीहा वाऽलौ
कसिद्धास्तंडुलागृहीतव्या इति। तत्र चोदकानुग्रहाय यूपस्य खलेवालीत्वं व्रीहीणां च तंडुलत्वं। यथासिद्धोपादाने हि चोदकप्रा
प्ताः खदिरादयो व्रीहयस्तत्संस्काराश्च छेदनावघातादयो बाध्येरन्। किंच। खलेवाली यूपकार्ये भवतीति विधोपपन्नात् स्यात् यूपे
नच्कार्यं करे यजमानत्वा इस्येव लंभेरे गोणीप्रवृत्तिः स्यात् यूपस्य तु खलेवालीत्वविधानं गौणत्वं। तस्मात्खदिरादयः खलेवालीक

एा०१ र्त्त्व्याः व्रीहयश्च तंडुलीकर्त्तव्या इति प्राप्ते ब्रूमः। यूपस्य खलेवाली च महृष्टार्थत्वं विधीयते खलेवाल्यास्तु यूपत्वं दृष्टार्थं यश्च नय
क्रमात्। तस्माद्यथासिद्धैव खादिर्यखादिरी वा खलेवाली यूपकार्यं कुर्यात् तंडुलाश्च यथासिद्धा एवेष्या हेयाः। प्रकृतौ हि श्रय
१७ णस्य विधानात्प्रकृतिद्रव्यमुपादाय स्वयमेव हविः कर्त्तव्यं विकृतावपि पत्रश्रपणं चरुर्णैव तत्रापि प्रकृतिद्रव्यं गृहीत्वा स्वयमे
17 व हविः कर्त्तव्यां तंडुलेषु श्रपणस्यार्थाभावान्नित्तेन श्रपणं कर्त्तव्यं तावल्लेन प्रकृतिद्रव्यप्राप्तिः। यासेच प्रकृतिद्रव्ये या याहा
ने व्रीहियवनियमः। तस्माल्लोकसिद्धा एव तंडुलाश्चैहा अन्नैहा वा अग्नहीतव्याः। परेषां प्रतिषेधः स्यात्। यथासिद्धखलेवाल्युपादाना।
त्वादिरादिकाष्ठं बाध्यमिति स्थितं। अथ प्रच्छेदनतक्षणादयः संस्काराः कर्त्तव्या नेति संदेहे चोदकानुग्रहाच्छेदनत्वाच्च कर्त्त
व्याः प्रयोजनाभावान्न कर्त्तव्याः। छिन्ना हि खलेवाली स्थूलसूक्ष्मीभूता निखातोच्छ्रिता तस्याः छेदनं तक्षणं निखननमुच्छ्रय
णं च तु स्थार्यमकर्त्तव्यं अर्थाभावे संस्कारार्थत्वं स्यात्। अथ पपर्यग्निहरणपरिव्ययणपरिषेचनादि खलेवाल्यां संभवत्प्रयो राम०
जनं पश्चाद् दृष्टार्थमंजनप्रोक्षणादि न खलेवाल्यां भवति नेति संशये न भवतीति ब्रूमः। कुतः। यूपार्थत्वात्तेषां इह चायूपे खले १७

वाल्यां पृथक्कार्यकरणाद्धुस्तार्थपर्यूहणादि न कर्त्तव्यं उच्यते। न पूर्वो नामैकः कश्चिद्दर्वोस्ति यद्दर्व्याः संस्काराः॥ किंतु
छेदनप्रोक्षणादिजन्यदृष्टादृष्टरूपाः संस्काराः काष्ठे वर्त्तमाना पूपश्राणाभिधेयानियोजनस्यांगभूताः। तत्रैकेषां विदुषां त-
दुस्तार्थानां लोपेप्यन्येषामनुष्ठार्थानां निवृत्तौ नास्ति प्रमाणं तस्मात्पर्यूहणां जनार्दनादयः कर्त्तव्याः। अपरे तु विपर्यासेना-
दर्व्यास्तत्त्वमेवस्मात्। महापितृयज्ञे श्रूयते। सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः। पि-
तृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमिति तत्र धानानामुहंतिः कर्त्तव्यो नेति संशये विधानादकर्त्तव्यः क्रियमाणे हि हं-
तौ धाना बंविहन्येन सक्तवो भवेयुः। तस्मादकर्त्तव्योवघातः सत्यं अयुणोत्तरकालं क्रियमाणो विघातः स्यात्पूर्वं तु हन्तिं कृ-
त्वा पश्चात्केयाः क्रियतेऽक्रममात्रं बाधित्वा। न धाना विहन्यते। न हि क्रमबाधे पदार्थोपि बाधितव्यः। तदुक्तं गुणलोपे च मुख्यस्याक्रि-
यास्यादिति। तस्मात्कर्त्तव्योवघात इत्येवं भाष्यकारेणाधिकरणं व्याख्यातं। तदिदमुपपन्नं। प्रकृत्यार्थमवघातः ततः पाकः तेन तना वपिर
त्तिक्रमविपर्यासः। पुनरुक्तं च गुणलोपे च मुख्यस्येत्यनेन न्यायेन। येवाहुः। न क्रमो नाम कश्चिद्गुणः पदार्थस्यातिरिक्तोऽस्ति यस्य

शा० १ दृष्टक्रमबाधं व्यवस्थापयामः। पदार्था एव हि विनताः प्रतीयन्ते नेन केवलस्य क्रमस्य बाधासंभवात्तद्बाधे पदार्थोपि त्वयापि बाधि
१८ तरसवधानो न कर्त्तव्य इत्येतन्निराकरणार्थमिदमधिकरणं। ननु विपर्यासो नास्तीति। तत्राप्याहुः। धानासु अर्पणं कृत्वावधा
नः प्रकृतौ च विपरीतमित्यस्ति विपर्यास इति। यदि विपर्यासः कथं तर्हि अवधानानुष्ठानं। न हि क्रमस्य प्रत्यग्बाधः संभवति। सत्सां न
18 स्तत्र परमार्थतः क्रमबाधः प्रकृतौ हि श्रुते पवहि व्रीहिष्ववधानः। कृतः ततः अत्रापि श्रुतानास्ते वधानास्त्ववधान इति नास्ति क्र
मविपर्यासः। प्रकृतावबधानात्परं अर्पणं इह तु विपरीतमित्येतावता विपर्यासवाचो युक्तिः। ननु धानावस्थायां हन्तिः क्षिपमा
णो विघातं कुर्यात् प्रयानविघातो भवतीति न यत्कुर्महे सकृद्देवान भ्यस्तमवहननं क्षिपतेन च भविष्यति विघात इति। नद
युक्तं संभवति हि दृष्टक्रमस्य बाधः। न एव हि पदार्थोऽन्यत्वेनाम्नेन च क्रमेणानुष्ठातुं शक्यं नेनेन क्रमस्य मात्रं तस्याभावेपि
पदार्था न निवर्त्तन्ते। ननु अर्पणं कृत्वावधान इति। न सूर्वं हन्तिं कृत्वापश्चात्साकः कार्य इति भाष्यविरुद्धं। परपि अर्पणोत्त राम
रकालेप्यवधाने विपर्यासो नास्ति श्रुते द्वयेऽवधानकरणादिति। न ह्यप्रसारं प्रकृतौ हि द्रव्य अवघातो युरोडाशाश्रवणं व्रीहि १८

श्रवणं वा नत्र धानादेवतासंबंधात्पुरोडाशकार्यैव वर्तते। न व्रीहि कार्ये प्रवृत्तौ चव्रीहि विषयो वघातो न पुरोडाशविषयः। तेन धाना
स्वपि चोदकप्राप्तेषु व्रीहिष्ववघातो न धानावस्थायां। नत्र तु क्रियमाणे हं नौक्रमविपर्यासः स्यादेव। धानासु वावघातकरणे धा
नात्वं विहन्येत। यत्तु सङ्कटे व्रीहित्व निष्पाम इति नयासस्य प्राकृतकार्यमदृष्टार्थमहं वेननं स्यात्। प्रकृतिवत्तुषविमोकार्थोव
घातः क्रियमाणो धानात्वं विहन्यात्। तस्मान्नैवमधिकरणं युक्तमिति यथावार्त्तिकं व्याख्यास्यामः। न धाना उदाहरणं। नत्रैव मंथ
उदाहरणं। नत्र पेषणं श्रपणोत्तरकालमर्थान्न भवति तस्मात्कृतमनुना प्राकृतमिति संशयः। प्रकृतौ पाकार्थं पेषणं पार्थक्यं भवति
। न ह्यसति पेषणे पुरोडाशनिर्वर्तकः पाकः कर्तुं शक्यते। तेन पाकार्थं पेषणं। मंथे तु विनैव पेषणेन भर्जनरूपः पाकस्तंडुलाव
स्थायामेव कृत इति तुष्टार्थमाकृतं पेषणं निवृत्तं न ज्ञितेषु नंदुलेषु सक्तुभावापादनाय लौकिकं पेषणमधर्मकं कर्तव्यमिति
प्राप्तेऽभ्रमः। न प्रकृतौ पाकार्थं पेषणं। द्वितीयाभूतायपेषणं श्रपणं चोभयमपि हविरर्थं। श्रपणाच्चनयोः पूर्वं पेषणं। इहत्वर्थादेव
पश्चात्क्रियत इति क्रममात्रमन्यत्। न च तदन्यते परार्थान्यत्वं तस्मात्प्राकृतमेव पेषणमिति कर्तव्याः पेषणधर्माः इति शास्त्र

रा.१. दीपिकायां द्वादशस्य द्वितीयः पादः। विकृतौ शास्त्रवत्त्वात्प्रधानस्य गुणानामधिकोऽसक्तिः संनिधानात् अग्नीषोमीये पशौ श्रूयते।
१९ एकादश प्रयाजान्यजतीति तथा चातुर्मास्येषु नव प्रयाजान्यजतीति नवानूयाजानिति। तथा वायव्ये पशौ हिरण्यगर्भः समवर्त्त
ताग्र इत्याघारमाघारयतीति। एवमन्यत्रापि यत्र प्राकृतमंगमप्राकृतगुणयुक्तं श्रूयते तदुदाहरणं सविचार्यते। किं तत्र चोद
केन प्राकृतानीतिकर्त्तव्यता प्राप्यते न वेति। तदर्थमिदं विचार्यते किमेतैर्गुणविशिष्टप्रयाजादिविधिः उत प्रयाजाद्यनुवादेन
गुणमात्रविधिरिति तत्र अतिदेशेन पदार्थानां तत्स्वरूपतः पर्युपस्थापनमस्ति प्रकारमात्रातिदेशात्। अतो नातिदेशप्राप्तसं
गीकरणेन गुणविधिः संभवति। तस्मात्संख्यादिविशिष्टाः प्रयाजादय एवात्र विधीयन्ते। एवं च धात्वर्थविधानाच्छुसनुग्रहो भ
वतीति तेच प्रयाजादयः प्रकृतौ क्लृप्तोपकारा विकृतौ श्रूयमाणा गृहमेधीयाज्यभागवदतिदेशं निरुंधंति तस्मान्न प्राकृती
तिकर्त्तव्यता निर्दिश्यत इति प्राप्ते ब्रूमः। प्रकारद्वारतः प्राप्तिरतिदेशेन कर्मणां। नान्यदृष्टा गुणः प्राक्तो विधातुमिति तद्वि राम.
धिः। न च ससांगत्वेनाप्यायं विशिष्टविधिगौरवं वाक्यकार्थविधिदोषश्च समानः पक्षयोर्द्वयोः। योपि हि श्रुत्यर्थविधिलिप्साया १९

धात्वर्थे विधिस्सति तेनापि गुणवादस्याप्रमादपाठादवश्यं वाक्यार्थविधिरंगीकर्त्तव्यः। तथा सति तत्र संक्रान्ते विधौ धात्वर्थानु
वादेनानेकविधिपरिजिहीर्षया प्रकारद्वारा प्राप्तिमालोक्य तदनुवादेन विधिर्गुणमात्रं विधत्ते। तस्मादेवं जानीयकेषु ग्रहमेधीय
न्यायाभावादिति सिद्धं॥ हिरण्यगर्भः पूर्वस्य मंत्रलिंगात्। वायव्ये पशौ श्रूयते। हिरण्यगर्भः समवर्त्तताग्र इत्याघारयतीति
तस्याकृताघारानुवादेन मंत्रविधिरिति स्थितं। प्रकृतौ च द्वावाघारौ पूर्वः प्राजापत्योऽमंत्रकश्चोत्तरस्त्वैन्द्रः समंत्रकः। तदिह किं
पूर्वस्याघारस्य मंत्रविधिः उतोत्तरस्येति संशये मंत्रस्य प्रजापतिलिंगवान् प्रजापतिर्वै हिरण्यगर्भः। प्रजापतेरनुरूपत्वाये
ति च वाक्यशेषात् पूर्वस्येति प्राप्ते ब्रूमः। पूर्वस्मिन्मंत्राभावान्मंत्रकार्यमस्ति तत्र मंत्रविधौ मंत्रकार्यमप्राकृतं कल्प्यं स्यात्। उत्त
रत्र तु प्रकृतावेव मंत्रविधानादस्ति मंत्रनियमजन्यमदृष्टं। तत्र मंत्रविधानं सुकरं मंत्रलिंगं विरुद्धमप्यविशिष्टमिति दर्शितं। भा
ष्ये वाक्यशेषोऽपि प्रजनां पतिः प्रजापतिरित्येवमिन्द्र एवोपपन्नः। यो यि खलु वाव प्रजायन्ति। स एवेन्द्र इति चैकत्वाउपपत्तिर्वाक्यशेष
स्य पूर्वाघारस्य चाहस्तैवा मंत्रत्वं हृदयते। न स्वाहाकारो न मंत्रं वाहेति तस्मादुत्तरस्य मंत्रः। संस्कारे तु क्रियान्तरं तस्य विधापक

शा.१. त्वात्। उक्तरेवाजिनमासादयतिपरिधौपशुं नियुंजीतेसत्त्वंशयः किमप्राकृतमासादनांतरंनियोजनांतरंचाद्दष्टार्थमुक्तरपरिधिं विशिष्टं
२० विधीयतेउतप्राकृतयोरेवासत्तिभावानपक्रमणारूपदृष्टप्रयोजनयोस्तत्करपरिधिविधिरिति। नत्रतीहृणोग्नत्वाज्जुंगवाचो
करस्यपरिधेस्वालीयत्वान्नदृष्टकार्यमासादनंनियोजनंचशक्यंकर्त्तुं। अतोप्राकृतकार्यमन्यधीयते। एवंचधात्वर्थविधा
20 नाल्लुसनुग्रहः। अन्यथावाक्यार्थविधिःस्यादितिसेवंप्राप्तेब्रूमः। नसंभवतिगुणमात्रविधौविशिष्टविधिर्युक्तः। साधारणश्चवाक्या
र्थविधिः। गुणस्यावर्ज्जनीयत्वात्। अतःप्राकृतयोर्गुणविधिः। नचाशक्यता। दृष्टंयुग्मनामुकरस्यछविमानंचपरिधेराश्रिसप्रा
कृतकार्यसंपादनात्। षड्ढिहीक्षयतीतिनासांमंत्रविकारःश्रुतिसंयोगात्। अग्नौप्रकृतिनोहीसाहुतयःषड्मासास्तासांच
षण्मंत्राःप्रकृतितएवप्राप्ताःआकूत्यैप्रयुजेग्नयेस्वाहेत्यादयः अग्नावपरेषण्मंत्राः आकूतिमग्निंप्रयुजंस्वाहेत्यादयः। तेच
हीक्षार्थतयाविनियुक्ताःषड्ढिहीक्षयतीति। हीक्षाहुतीनांवाभ्यासःश्रूयतेद्वादशजुहोतीति। तत्रसंशयः। किंवैकृतैर्मंत्रैःप्रा राम.
कृतावाध्यंतेसमुच्चीयंतेवेति। तत्रप्रसक्षणपा[redacted]ठेनप्रसप्तवचनेनचावैकृताःप्राकृतान्मंत्रान्बा[redacted]धेरन्नेककार्यतः। यद्य २०

पिष्टा दृष्टा जुहोतीति वचनाद्धोमानामभ्यासः। तथापि वैकृतानामेव प्रसक्तवचनविहितानां चोदकप्राप्तप्राकृतमंत्रबाधेन
होमांगत्वात्तैरेवाभ्यस्तैर्होमदृष्टापि होतव्या इति प्राप्ते ब्रूमः। न प्रसक्तेणवाक्येन होमार्थं वैकृतानाम्भूतानां दीक्षार्थं नावलाचेषां होमांग
त्वं प्रकल्प्यते। सकृत्प्रयोगमात्राच्चनादर्थ्यमुपपद्यते। वैकृतैः प्राकृतानः तस्मात्समुच्चेयानवा[redacted] धनं। षड्भिर्दीक्षयती
ति दीक्षार्थताश्रुतानां साचस्वाहाकारलिंगानां होमद्वारेणेति दीक्षार्थत्वसिद्धये होमांगता कल्प्यते। सकृत्प्रयुक्तैरेव षड्भिर्होमेषु
दीक्षार्थतासिद्धेर्नाभ्यासे प्रमाणमस्तीति नाभ्यासवत्त्वेन होमानां द्वादशत्वान्मंत्राणामपि प्राकृतवैकृतानां समु
च्चयः। आग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात्। अस्ति पुनराधेयं। तत्राग्न्याधेयधर्मकं।
भ्य एकादशभ्योऽधिकानामागमः उत प्रथमोत्तमयोरेवाभ्यासेन संख्यापूरणम् उत यावदुक्तं त्रिरभ्यासं प्रथमोत्तमयोः
कृत्वा अवशिष्टानामागम इति संशये। संख्यासामंजस्यादेकादशभ्यः प्राकृतीभ्योऽतिरिक्तानां सर्वासामागमः। नैवं।
प्रकृतौ हि यं च दशासु सामिधेनीषु विहितासु एकादशसु सामिधेनीषु पठितासु वचनं त्रिः प्रथमामन्वाह त्रिरुत्तमामिति
संख्यापूरणं यावद्भवति तावत्प्रथमोत्तमयोरभ्यासनियममिषेव परं। पूरणं संख्याभिप्राय त्रिःशब्दो दृष्टार्थत्वात्। अभि राम॰
त्वस्वरूपपरत्वेऽदृष्टार्थतास्यात् तस्मात् प्रथमोत्तमयोरभ्यासेन संख्यापूरणमिति प्राप्ते ब्रूमः स्यादेवं यदि प्रपूरणसं ३९

ख्यायाः स्थिरत्वस्य च संप्रतिपत्तिः स्यात्तावता नत्वेन दृष्टिः। न ह्युत्तरं प्रथमोत्तमयोरभ्यासे न संख्यायां पूर्यमाणायामेकैकस्यास्त्रिर
भ्यासो भवति। द्विचतुरभ्यासेनापि न स्पूरणसंभवात् तस्मात् त्रिरभ्यास एव तत्र विवक्षितो न यावत्पूरणमभ्यासः। तेन विकृ
तिष्वपि त्रिरभ्यास एव प्राप्तो न यावत्पूरणमभ्यासः। तस्मात्प्रथमोत्तमे त्रिरभ्यस्यावशिष्टेन माग्नेयीनां द्वात्रतयीभ्यस्ताऽऽगमः।
किं पुनः आगम्यमानानां कर्मसंबंधे प्रमाणं। न तावल्लिंगं तस्याग्न्यादिस्वरूपमात्रविषयत्वेन क्रत्वर्थत्वे प्रमाणाभावात्। स
र्वत्र हि लिंगं यत्किंचित्प्रमाणं क्रतुसंबंधसामान्यमपेक्ष्य द्वारविशेषमात्रे प्रमाणमिति याज्यापुरोनुवाक्याकांडे व्याख्या
तं न चान्यदप्यप्रमाणं पश्यामः। उच्यते संख्यैवात्र संख्येयानां कर्मांगत्वे प्रमाणं न याहि सामिधेनीपरिच्छेदद्वारयाकृतेरूप
कर्तव्यं। अग्निसमिंधनप्रकाशिकाश्चैव सामिधेन्य उच्यंते। तेन तत्समर्थाः याकाश्चिदृचो वत्सपमुपादातव्याः। एवं सर्व
त्रागमे द्रष्टव्यं षोडशिनो वैकृतत्वं तत्र क्रत्वविधानात् अस्ति ज्योतिष्टोमे षोडशी। स च षोडशिना वीर्यकाम इति पुरुषा
र्थतया विहितोऽपि पुनः क्रत्वर्थतया श्रूयते अथाग्निष्टोमे राजन्यस्य गृह्णीयादुक्थ्ये गृह्णीयादतिरात्रे ब्राह्मणस्य उत्तरेह निह्निरा

शा॰ १॰ त्रस्य गृह्यते मध्यमेहं स्त्रिरात्रस्य चतुर्थेऽहन्यहीनस्य गृह्यत इति। तत्र कर्वर्थं षोडशिनं प्रतिसंदेहः। किं प्रकृतौ स्यात् उत
४० विकृतिष्वेवोत्कृष्यत इति। उत्तरे ह नि द्विरात्रस्य गृह्यत इत्यादिवचने विकृतिसंबंधावगमादग्निष्टोमे राजन्यस्येत्यादिवचन
स्य वैकृताग्निष्टोमाभिप्रायत्वेनाप्यविरोधात्प्रकरणं बाधित्वा वाक्येनोत्कर्षप्राप्तेर्ब्रूमः। प्रकृतिप्रकरणाम्नानैरग्निष्टोमादिश
ष्वस्त्रैव संभवद्भिः किमित्यसन्निहितापि विकृतिरभिधीयते तस्माद्वाक्येनैव प्रकृतौ स्यात्। तत्र राजन्यादिनिमित्तेन विहि
तः सविकृतिष्वेतैमित्तिको विधीयते। उत्तरे ह नि द्विरात्रस्येति। तस्याग्रयणाग्रहणं। षोडशिन्येव संदेहः। किमसावाग्रयणाद्
ग्राह्योऽग्रहीतव्यः। उताग्रयणादेवेति तत्राग्रयणात्स्थाल्या निरुक्तान्निगृह्णातीति वचनद्वयादिकल्पेन समुच्चयेन वा
द्वाभ्यां गृह्यते। एवमपर्यवसिते पूर्वपक्षे मध्ये चिंता। तृतीयसवने स्यात्।। किं षोडशी सवनत्रये ग्राह्य उत तृतीयसवन एवेति
किं पुनः कारणमंतरा चिंतायाः। भूलाधिकरणसिद्धांते कालोपलक्षणात्वमुक्त्वास्य स्थालास्यनिष्ठिते च तस्मिन्पूर्वयोः सवनयो राम॰
र्ग्रहणमाशंक्य किंतु मरात्रकं तयोरुक्थ्याभावात्। तस्मान्मध्ये चिंतेति केचित्। तदयुक्तं एवमपि पूर्वपक्षं समाप्य कर्तव्ये ४०

यंश्चिनास्यान्नमध्ये। किंच। प्रातःसवने ग्रहीतव्यइत्यादिवचनात्स्य सवनत्रये ग्रहणमाशंक्यते। नच वचनमस्य यथि
धि संभवति। तस्माद्यद्यपि पूर्वयोः सवनयोरुक्थ्याभवात्तदुत्तरकालत्वात्तन संभवति तथापि वचनब द्ग्रहीतव्यः। कालत्व
च ननु तृतीयसवनग्रहणाभिप्रायं भविष्यतीति विद्युनेव पूर्वयोरपि सवनयोरुक्थ्यः। तस्माद्द्वितीयगतिः सूत्रकारश्चिंतां
तरमध्येपि प्रसंगात्चिंतां तरं कृतवानित्येव वक्ष्यामः। तत्र प्रातःसवने गृह्णातीत्यादिभिर्वाक्यैः सवनत्रयेपि विधानात्त्रि
ष्वपि ग्राह्यः। नैवं। प्रातःसवनाद्यनुक्रमणं निंदाद्वारेण तृतीयसवनस्य सर्थं सवनत्रयं त्व्यनुक्रम्य यस्मात्प्रातःसवने गृह्णीयात्तद्ब
ज्ञोवै षोडशीत्यादिना सवनद्वयं निंदित्वात् तृतीयसवने ग्राह्य इति प्रयते। तस्मात्सर्वमिदमेकवाक्यं तृतीयसवने षोडशिविधानार्थ
मिति न त्रैवास्य ग्रहणं स्थितानाउत्तरं। उक्थ्यानि गृह्णाति षोडशिनमिति वचनादुक्थ्यादपि ग्रहीतव्यमित्युक्तं। यदपि त्रारवां नख
चनं परं च मुक्थ्यात्षोडशिनं गृह्णातीति तत्राप्युक्थ्यादिसमपादान पंचमी। नहि रिच्छक्ष्योगनिमित्ता। पराक्षदृस्य परावी
स्तामिधेनी रितिवद्दनभ्यासवाचित्वेन रिक्तद्ध्वाभावात्। तस्मादुभाभ्यांग्नहणमिति माषे ब्रूमः। कृत्स्नस्याग्नयणादेवग्रह

शा॰ १॰ णंनिसवद्भुतं। नयुक्तंबाधितुंतस्मान्नविकल्पसमुच्चयौ। यत्तुवचनादिति। तत्रयदाचमुच्छब्दादिसत्त्वंयदाकदाचिदोऽतस्या
४१ सवचनः सन्ननर्थकः स्यात्। अभ्यासस्यप्राप्तभावात्। तस्माद्द्विरुक्तशब्दोपंकालवचनः। तन्निमित्ताचेयंपंचमीउच्छब्दाद्द
41 ह्वैकालेषोडशिनंगृह्णातीति। उत्तमानार्थवाचोच्छब्दान्निगृह्णातीसत्रापिद्विरुक्तनिमित्तैवपंचमी। नह्येवरूपंद्विरुक्तयो
गापेक्षैवसविनापितेनमासाद्यवक्ष्यामीसादिषुदर्शनात्। तेनेपंसहयुक्तेनतीयावदर्थमात्रापेक्षानशब्दप्रयोगमपेक्ष
ते। एवंवाग्नयणात्क्रतुस्यनियवद्ग्रहणंहेनवाविनंसंभवतितस्मादाग्नयणादेवग्रहीतव्यः उच्छब्दाग्निष्टोमसंयोगा
दुक्तनशास्त्रस्यासत्तनिहिसंस्थान्यत्वं। षोडश्यपिवयदाऽप्यग्निष्टोमेराराजन्यस्यगृह्णीयादप्युच्चैर्ग्नात्यदसादिव
चनादग्निष्टोमात्वसयोर्गत्येनेतदाकिमुक्तनशास्त्रः स्यादुतनतदापिसम्स्तनशास्त्रइतिसंशये। उच्छब्दाग्निष्टोमसंयो
गेनास्यस्तोत्रादिकंभवेत्। षोडशिस्तोत्रसंस्थायांनोकूथ्याग्निष्टोमनाभवेत्। अग्निष्टोमादिशब्दाहिस्तोत्रसंस्थानि राम॰
मित्तकाः। षोडशिस्तोत्रसंस्थायांनाग्निष्टोमः क्रतुर्भवेत्। तत्राग्निष्टोमेग्नात्यदसेतदेवविरुध्यते। तस्मादुक्तनशास्त्रः स्या ४१

त्। सप्तसंस्थान्यतायत्तिर्वचनात्पुनरुत्पद्यते। पूर्वसंस्थोपमर्द्देन संस्थैवान्या विधीयते। उक्थसंस्थो हि यः प्राप्तस्तथाग्नि
ष्टोमसंस्थितिः। राजन्यस्य तथा नासौ किन्तु षोडशिसंस्थितिः। एषैव वचनस्यार्थः तस्मात्सत्सु तच्छास्त्रकः। न द्वंद्वगत्वेन हि स्तो
त्रं शस्त्रं चाहस्य चोदितं। एकविंशस्तोत्रं भवति प्रतिष्ठित्यै इह विरुद्धस्य तु इति विहितं स्तनतच्छास्त्रमसति विरोधे किमुक्थाग्नि
ष्टोमसंस्थस्य न क्रियते तस्मात्तत्स्तत्र शास्त्रः। अभावादतिरात्रेषु गृह्यते। आङ्गिरसां द्विरात्रे श्रूयते वैखानसं पूर्वेऽहन्साम भ
वति षोडश्यप्युत्तरेऽहनि किमिदमप्राप्तस्य षोडशिनो विधानार्थमुत प्राप्तस्य परिसंख्यार्थमिति संशये। विधिः प्राप्त्यभावात्।
न तावच्चोदकेन प्राप्तिः सत्या तु मानिकः। तस्मात्तेः प्रागेव प्रसक्तो वचनमेव विधीयते उत्तरेऽहन्द्विरात्रस्य गृह्यत इत्यनेन त्व
थवा वैकल्पिकी चोदकप्राप्तिः। प्रकृतावतिरात्रे षोडशिनो वैकल्पिकत्वात्। तत्र नियमार्थं विधानं। विहिते च तस्मिन्नानुको
प्रापयति। तस्मान्न तावच्चोदकप्राप्तिमपेक्ष्य तत्परिसंख्या। न वाऽनेनैवोत्तरेऽहन्द्विरात्रस्य गृह्यत इति सामान्यवचनेन प्रा
प्तत्वात् षोडशिनः पुनर्वचनं परिसंख्यार्थमिति न्याय्यं। सामान्येन हि सर्वद्विरात्राणामिदं वचनं तस्मात्तेः प्रागेवांगिरसां द्विरात्रे षोड

शा॰ १॰ रुक्तत्वरदिति विशेषवचनेन विधीयते। तस्मादप्राप्तविधिः षोडश्युत्तर इति नैतदेवं। यद्यपीदं सामान्यवाचनं तथैवाथापि प्र
४२ सक्तेनैव वाक्येन द्विरात्रे षूत्तरेषामहःसु विकल्पेन प्राप्तः षोडशी नियतः। षोडश्युत्तरस्य त्वनु नास्ति प्रसक्तो द्विरात्रादिसं
योगः प्रकरणानुकल्प्यते तत्त्वउ वैलं वाक्याश्च तस्मात्सामान्यवचनेनैव कल्पिकी चोदकप्राप्तिमपोद्य नियम्यमानः षोडशी
षोडश्युत्तरस्यनेन द्विरात्रान्तरेभ्यः परिसंख्यायते। येनांगिरसां द्विरात्र एव नियमः। द्विरात्रांशीं तरेषु तु यथाचोदकं विकल्प
एवस्यात्। तदिदं त्वस्मत्तरकारव्यानमधिकरणस्यानुपपन्नमिति मन्वानेन भाष्यकारेणाव्याख्यानान्तरमारब्धं तत्र यः पू
र्वस्मिन्व्याख्याने सिद्धान्तः स एव पूर्वः पक्षः परिसंख्येति। सिद्धान्तस्तु। परिसंख्यायास्त्रिदोषत्वादहरेवान सविधिशेषायं न
विधिः परिसंख्या वा। तस्मात्सर्वद्विरात्रेषूत्तरेषामहःसु नियत एव षोडशी सामान्यवचमेनप्राप्तत्वादुत्तरेणाप
रिसंख्यानत्वात्। चतुर्थे चतुर्थेहन्यहीनस्य गृह्णत इत्यभ्यासेन प्रतीयेत भोजनवत्। षोडश्येव चतुर्थेहन्यहीनस्य राम॰
गृह्णत इति निरूप्यमाणः संदिह्यते। किमेकस्यैवाहीनस्य चतुर्थेहीत्यापुनस्तस्यैवाहीनस्य चतुर्थेभ्यासेन गृहीतव्यः उतैकस्याहीन ४२

स्यैकस्मिन्नेव चतुर्थे सकृद्ग्रहणं। वीप्सानुना नाहीनाभिप्रायेणेति। तत्र नाहीनाभिप्रायत्वेन्याप्राप्तत्वेन वीप्सानर्थक्याद्धी।
नस्येति चैकश्रवणाद्येकस्मिन्नहीने चतुर्थे चतुर्थेऽभ्यासः। नैवं। अहीनस्य चतुर्थदरस्युच्यते। एकस्य चाहीनस्यैकं तु चेद्ग्रहः।
यत्तु चतुर्थाच्चतुर्थेन ह हीनस्याष्टमं भवति। न तग्रहणादहीनस्य चतुर्थे गृह्णीयात। तस्मात्सकृद्ग्रहणं एकवचनं तु सामान्या
भिप्रायं स्याद्वीप्साया प्राप्त्यनुवादः। जगत्साम्नि सामाभावाद्धकः साम तद्राख्यं स्यात्। ज्योतिष्टोमे श्रूयते यदि रथंतरसामा
सोमः स्यादैन्द्रवायवाग्रान्गृह्णीयात्। यदि बृहत्सामा शुक्राग्रान्यदि जगत्सामाग्रयणाग्रानिति। किमाग्रयणाग्रता ज्योति
ष्टोमे निविशते किं वोत्कृष्यत इति संशये। प्रकरणात् ज्योतिष्टोमे स्यात्। जगत्साम च्छान्दोगे नापि एम ज्योतिष्टोमप्रकरणाद्यथा
कथंचिदुच्यत इति प्राप्तेऽब्रूमः। न जगत्साम साम ज्योतिष्टोमे स्यात्त्रवाकु विरहिति नेनायमृग्द्वारेण व्यपदेशः। जगत्साम च्यु
सन्नं साम जगत्साम। तथा त्र्यसजगत्सामा। न तु ज्योतिष्टोमेन रह्यस्ति। विधानेन तु विधुविति। तस्माद्द्विषुवान् जगत्सामा। तत्संयु
क्तत्वाग्रयणाग्रताप्रकरणादुत्कृष्यते एवं वा। यदि जगत्सामाग्रयणाग्रानिस त्रैव जगत्सामत्राहेः संदेहः। किमनेन ज्यो

शा॰ १॰ तिष्टोमएवरथंतरसामावृहत्सामावोच्यते किंवासएवोभयसामा। अथवा रथंतरसामैव। उतयत्रजगसा। श्रुसन्नंसामविषुव
४३ तिसोनेनाभिधीयत इति। प्रकरणात्ज्योतिष्टोमएवान्यतरस्सामा विधीयते। तथा सति पूर्वाभ्यामग्नताभ्यामाग्नयणाग्नतायाविक
ल्पएवस्यात्। तस्मादुभयसाजगत्सामाजगच्छ्रेहि हिकृत्स्नवचनः कात्स्न्यं च समुच्चये स्यात्। तस्मात्समुच्चितोभयसामाजगत्सामा
43 नैवमपि युक्तं। एवं हि सति जगत्सामे स्यनर्थकं स्यादाग्नयणाग्रात्गृह्णीयादिसेनावतेचोभयसामपक्षेनिवेशासिद्धेः। अन्यतरसा
मत्वपक्षयोः पूर्वाभ्यामग्नताभ्यामवरुद्धत्वात्। न चोभयसामत्वं ज्योतिष्टोमेस्ति वृहद्रथंतरयोर्वचनेनैव विकल्पविधानात्।
तस्माद्दीक्षानमस्य जगतः स्वर्दृशमिसेवं जगच्छवृवसामुत्पन्नं रथंतरयेवजगत्वामरत्नतः तत्सामाजग—येतिप्राप्तेब्रू
मः। पद्द्वारेणास्त्राचासामत्वपक्षेनिव्यंस्यात्तत्रत्वक्षिनक्षणास्यात्। तस्माज्जगत्सामुत्पन्नेन साम्नासौ विषुवामेवजगत्सा
मातनहर्थंचाग्नयणाग्नत्व। पूर्वव्याख्यायांनेमित्तिकमाग्नयणाग्नत्वं विचारितं तद्धेतुत्वेन तु जगत्सामशब्दप्रस्तावः। इहतु। राम॰
स एव सासाहिचारितइति भेदः। उभयसाम्निनैमित्तकं विकल्पेन समत्वात्स्यात्॥ ८ यत्रवृहत्साथंतरपृष्ठयोः समुच्चयः सं ४३

सर्वगोस्त्वाहिखुनत्रयस्यक्रतोरर्थंतत्रनिमित्तंगृहन्त्विनंचउपपत्तिंरथनरश्मेस्यप्रतिपरंकुर्यात्अग्रवतिंगृहस्य
श्मेस्येत्यादितदुभयंविकल्पेनकर्तव्यंउत्तरथंतरनियित्तमेवाथवोभयंनकर्तव्यंइतिसंशयः।तत्रोभयसामत्वेपिरथं
तरेस्यगृहतश्वसद्भावात्सत्तयाचोभयोःक्रतुविशेषत्वाद्उभयमपिप्राप्तंसमुच्चयासंभवाद्विशेषाग्रहणाच्चविक-
ल्पः।अथवामुख्यत्वाद्रथंतरनिमित्तमेवस्यादितिप्राप्तेब्रूमः।इहरथंतरेहिप्रक्रतोनिरपेक्षपासत्तयापरस्परव्यवच्छेदेन
वाक्रतुविशेषंतीनिमित्ततामुपगते।अन्यत्रभयोःसहैवक्रतुसंबंधात्सापेक्षयोर्नान्यतरेणापिक्रतुर्विशेष्यते।तस्मान्निमि
त्तविधानादकर्तव्यांऐन्द्रवायवस्याग्रवचनाद्यादितःप्रतिकर्षःस्यात्।तोतिष्ठोमेउपांश्वंतर्यामोअधाराग्रहोविधायऐन्द्रवायवमो
त्रावरुणादीनांधाराग्रहणामुपक्रमेश्रूयते।वाग्वाएषायदैन्द्रवायवइदैन्द्रवायवाग्राग्रहाग्ररत्युतेवाचमेवानुप्रयंतिअएणधार
पाग्रह्णानीति।तत्रसंशयः।किमैन्द्रवायवःसर्वादितउपांश्वंतर्यामाभ्यामपिपूर्वंग्रहीतव्यउतयाठप्राप्तस्थानइति।तद
र्थमिदंविचार्यते।किमैन्द्रवायवप्रभृतीनांग्रहानुवादेनैन्द्रवायवाग्रताधर्मेंगित्रेनविधीयतइति।तत्रग्रहाणांवचनानं

शा॰ ९ रैरेवप्राप्तत्वात्तद्ग्रहणाविधिरयं। तच्चाविशेषेणसर्वग्रहणेमंत्राणामुपांशुत्वंनर्थामर्थौमेरयिसंपारयितव्यं। इतरथातयोर्वैगुण्यं
४४ स्यात्। अतःसर्वा। इतःप्रतिकर्षःस्यात्। स्यादेवं। यद्यग्रहणाविधिःस्यात्। ग्रहविधिस्त्वयं। कथं। धारासंयोगादिधाराग्रहाणयत्रग्रहा
तिनोयाज्ञातं। तेषांचपाठप्राप्तंमैत्रैन्द्रवायवत्वं। अतोव्युत्क्रमात्तांमैत्रमैन्द्रवायवत्वादीनांग्रहाणांसंश्लेषेणायमुपमुपक्रमः। तस्मात्स्वस्था
नस्थेवैन्द्रवायवस्यग्रहणं कामसंयोगेनुवचनादादितःप्रतिकर्षःस्यात्। तत्रैवसंश्लेषेणोपक्रम्यप्रागिस्तारवचनेभ्यःकामसंयु
क्तानिवचनान्याम्नानानितैन्द्रवायवाग्रान्गृह्णीयाद्यःकामयेतयथापूर्वंप्रजाःकल्पेरन्निति। तत्रकिंसर्वादितःप्रतिकर्षउत
तत्रापिस्वस्थानएवग्रहणमिति। तत्रग्रहणंनित्यत्वान्नकामेविधानं। अतोत्रैन्द्रवायवाग्रतागुणःकामायविधीयतइति
सर्वादितःप्रतिकर्षः। नैवं। गुणोहिविधीयमानःप्रकृतान्ग्रहानाश्रित्यविधीयते। धाराग्रहाश्चप्रकृताः। तेषांचस्वरूपवदैन्द्रवा
यवाग्रतापिपाठादेवप्राप्ता। स्वस्थनीकामेविधानयानद्दरंक्षसर्थविधानायग्रहणमेवंकामेविहितमतःकामसंयोगेपिस्व राम॰
स्थानएवैन्द्रवायवः परेषुवाग्रशब्दः पूर्ववश्यान्तादिषु तत्रैवश्रूयतेशुक्राग्रान्गृह्णीयात्प्रतिष्ठाकामः मंथ्यग्रानभि ४४

चरन्नित्यादि। तत्र संशयः किं शुक्राग्रायणादीनामपि काम्ययोगे स्वस्थाने ग्रहणं उत प्रतिकर्ष इति। तत्र पूर्वपक्षे च शुक्रप्रभृतीनां नि
त्यानां ग्रहाणां काम्ये विधानात् स्वस्थाने प्राप्ते उच्यते। नहि प्रकृताधारा ग्रहाः पाठतः शुक्राग्रायणेन तद्देवतावादेन ग्रहाणां काम्ये विधिः
स्यादैन्द्रवायवाग्राहित्वेन तत्र ग्रहकाम्ये ग्रहेषु च शुक्राग्रतां विदधद्वाक्यं भिद्यते। तस्माद्ग्रहणाश्रितः शुक्राग्रतादिगुणः काम्याय
विधीयत इति प्रतिकर्षः पुरस्तादैन्द्रवायवस्य कृतदेशत्वात् स्थिते प्रतिकर्षे विंसते किं सर्वादितः प्रतिकर्षः। उतैन्द्रवायवा
त्पूर्वमिति। विशेषाग्रहात् सर्वग्रहाणां पुरस्ताच्छुक्रोपक्रमः स्यादिति प्राप्ते ब्रूमः। काम्याय हि गुणो विधीयमानः प्रकृतान् ग्रहा
नाश्रित्य विधीयते। प्रकृताश्चय ऐन्द्रवाग्रा गृह्यन्त इत्यनेन साधारणेनोपक्रमेणोपक्रान्ता ऐन्द्रवायवाद्याधारा ग्रहा वक्ष्यमा
णाः। तेन तानेवाश्रित्य शुक्राग्रतागुणः काम्याय विधीयत इति न सर्वादितः प्रतिकर्षः। इदमेव वक्ष्यमाणानां साधारणोपक्र
मप्रयोजनं। कथं नाम सर्व एव वक्ष्यमाणा ग्रहाः काम्यानां गुणानामाश्रयत्वं प्रतिपद्येरन्निति॥ सादनं चाविशेषत्वात् ॥छ॥
धाराग्रहाणां पूर्वं पूर्वं गृहीत्वा सादयित्वोत्तरोत्तरस्य ग्रहणं सर्वेषु च गृहीतेषु सादितेषु च पश्चात्क्रमेण प्रदानमिसेषानावन्ति

श्रा·१० सङ्कृप्तिः। कामाय तु शुक्रादिग्रहणेष्वपकृष्यमाणेषु किं सादनं प्रतिकृष्यतेनेति संशये। वचनाभावान्न प्रतिकर्ष इति प्राप्त
४५ उच्यते। सादनस्यैतस्य योजनं यदुत्तरग्रहाणां साहित्यसंपादनं न ह्यनासादितैकमपरो ग्रहीतुं शक्यते। तस्माद्ग्रहणशेषत्वात्सा
दनस्य तत्प्रतिकर्षे प्रतिकर्षः प्रदानं चापि सादनवत्। तथा प्रदानं किं प्रतिकृष्यतेनेति संदेहे। प्रदानोपक्रमत्वाद्ग्रहणस्य तत्
प्रतिकर्षे प्रदानस्य प्रतिकर्षः। नैवं। तस्य वदानवत्प्रदानोपक्रमो ग्रहणं। सर्वेषु गृहीतेषु पश्चात्प्रदानं नित्यसङ्कृप्तावि स्कन्
मवगतस्वरूपं च ग्रहणं कामेपि प्रतिकृष्यत इति न प्रतिकृष्यमाणस्यापि प्रदानोपक्रमत्वं। तस्मान्न प्रदानापकर्षः अ
नीकायां न्यायोल्केष्कात्मानं गुणार्थस्यात् द्वादशाहे अनीकाम्नाताऐन्द्रवायवाग्रो प्रायणीयोदयनीयो दशमं चाहः। अ
थैतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रम् अथाग्रयणाग्रम् अथैन्द्रवायवाग्रम् अथ शुक्राग्रमित्यादि। तत्र प्र
थमद्वितीययोरह्नोरैन्द्रवायवाग्रता शुक्राग्रता च श्रुता। सा तयोरथंतरसामत्वाद्बृहत्सामत्वाच्च प्रकृतित एव प्राप्ता सती राम·
किमर्थं श्रूयत इति चिंत्यते। अनुवादमात्रमित्येकः पक्षः। तथा च सत्यानर्थक्यं स्यात्तस्माद्दंगांतरपरिसंख्यार्थं। सापि त्रिहो ४५

षा। तस्मादर्थवादार्थं। तृतीयेऽहन्याग्रयणाग्रतानाप्याप्यापूर्व्ययोरैन्द्रवायवाग्रतायाः शुक्राग्रतायाश्चानुष्ठितत्वाद् जामित्वाय।
ति। सिद्धांतस्तु। प्रकृतौ रथंतरसामत्वेन बृहत्सामत्वेन च निमित्तेन नैमित्तिकयोरैन्द्रवायवाग्रशुक्राग्रत्वे विहिते तथैव चोदकेन।
प्राप्ते नेदं द्वितीयनैमित्तिकार्थं वचनं। तस्य च प्रयोजनं तद्धि कृति षसस पि रथंतरबृहत्सामत्वे ऐन्द्रवायवस्य शुक्राग्रतयोः सिद्धिः द्वा
दशाहस्य व्यूढसमूढत्वं दृष्टवत्समानविधानं स्यात्। छन्दोगानां विशेषद्वैविध्यात् द्विविधो द्वादशाहः॥ समूढो व्यूढश्च। समू
ढः पूर्वोक्तः। व्यूढस्त्वैन्द्रवायवाग्रे प्रायणीयोदयनीयो प्रथमेनरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः। अथ शुक्राग्रं। अ
थ द्वे आग्रयणाग्रे॥ अथैन्द्रवायवाग्रं॥ अथ द्वे शुक्राग्रे॥ अथाग्रयणाग्रं॥ अथ द्वे ऐन्द्रवायवाग्रे इति। तत्र किं द्वे अपि रूपे
द्वादशाहस्य नैसर्गिके वैकल्पिके क्रतुंगे उत समूढमेव नित्यं। यद्व्यूढं तु तस्य वक्ष्यमाणो विकार इति॥ तत्र व्यूढस्यापि कामसं
युक्तस्योत्सन्नस्य वाक्यान्तरेण कामसंयोगे सत्यपि कृत्स्नभयत्वे संयोगपृथक्त्वमिति सनेनन्यायेन क्रत्वर्थता पुरुषार्थता च।
तस्मात् समूढवद्व्यूढोऽपि क्रत्वर्थः। उच्यते। तद्ध्यादिवत् व्यूढस्योभयार्थत्वं युक्तं तत्र हि दधीन्द्रियसंबंधं विरधत्वात्कां लोकतो।

शा॰ १॰ इधिस्वरूपंप्रकरणेन चाग्नेयसंबंधंलब्धानरध्यासुहोतीसेनंइधिविधिमपेक्षते। अटस्वरूपस्यतुलोकतोप्रसिद्धेरवश्यंवाक्यांत
४६ रसिद्धेर्वग्रहो त्पत्तिः कामवाक्येनकल्पेविधानव्यासतः प्रक्षेपणकामवाक्येनकलशाभाद्यूटोत्पत्तिवाक्यंनप्रकरणेनक्रत्वंगनां
46 भजते। तस्मात्तमूटविकरोभूटः एकादशिनीचत्मनीकापरिवृत्तिःस्यात्‌ छगवामयनेएकषष्ठ्यधिकानित्रीणिशतान्यहानि।
अशीतिशतंपूर्वंपक्षः। तयोत्तरं। मध्येविषुवान्‌॥ तत्राहः क्लृप्तिंताज्ञकिनःसमामनंति। प्रायणीयंप्रथममहः। चतुर्विंशं
द्वितीयं। ततश्चत्वारोभिप्लवाःषडहाः। एकःपृष्ठ्यःषडहः। समासःसद्वितीयः। सतृतीयः। सचतुर्थः। सचतुर्थः। सपंचमः।
ततस्त्रयोभिप्लवाःषडहाः। एकःपृष्ठ्यःषडहः। अभिजिन्नामैकाहः। त्रयःस्वरसामानः। इत्यष्टाविंशतिरहानि॥ आद्याभ्याम
होभ्यांसहषण्मासाः। तदिदंपूर्वंपक्षः। ततोविषुवान्‌। अथोत्तरंपक्षः। त्रयःस्वरस्वरसामानः। विश्वजिन्नामैकाहः। पृष्ठ्यः राम॰
षडहस्त्रयस्त्रिंशारंभणः। तयोभिप्लवाःषडहाः। तान्यष्टाविंशतिरहानि। पुनःपृष्ठ्यःषडहस्त्रयस्त्रिंशारंभणः। चत्वारोभि
प्लवाःषडहाःसमासःसद्वितीयःसतृतीयसचतुर्थः। ततंस्त्रयोभिप्लवाःषडहाः। आयुर्गौरितिद्वेअहनी। द्वादशाहस्यदशा ४६

हानि। महाव्रतं वातिरात्रश्चेति द्वात्रिंशदहानि आद्यैरष्टाविंशत्यहोभिः सह षण्मासाः। तत्र भाष्यकारेणाग्रायणीयो र
यनीयमध्यवर्त्तिनीहा दृशी हि द्वौ अनीकौ चोदकमात्रामात्रिसविचारितं। किंदं उक्लृप्तिवद्भावर्त्तनीया किंवा नवानाम
प्यनीकानां स्वे स्वे स्थाने विवृद्धिरिति। तदर्थं च विचारितं॥ ऐंद्रवायवाग्रं प्रथममहरित्यहतां विवक्षितं॥ अतश्च प्रथमा
दीनामङ्गानां गमनात् ऐंद्रवायवाग्रत्वादयोऽहरपूर्वप्रयुक्ता उत प्रथमादीनां यज्ञभागानां धर्म्माः परमापूर्वप्रयुक्ता इति
। तत्राहर्गणस्य क्रतुत्वादहर्धर्मत्वमतश्च प्राप्तौ यानं तरस्याङ्गो धर्म ऐंद्रवाग्रतानिर्यानं तरस्य शुक्राग्रता। तदनंत
रस्याग्रयणाग्रता। गवामयनेपि तथैव प्राप्नोति। तदभिप्रायानीकैर्नवसहस्तु समनुष्ठितेषु पुनरैंद्रवायवाग्रं प्रथममम
हरित्येतद्देवोपतिष्ठते। तथा ततः परमपि तस्मादृं उक्लृप्तिवदावृत्तिरिति प्राप्ते सिद्धान्तितं। उद्दिश्यमानस्य हि प्रथमा
देरङ्गाविशेषणं न संभवतीति। तस्मादथममैंद्रवायवाग्रमथ शुक्राग्रमित्येतावद् विवक्षितं। नवानां चानीकानां नव
धाविभागः। गवामयनेपि पूर्वपक्षे न वधा विभज्य प्रथमादिभागेषु नवस्वैंद्रवायवाग्रतादीनां नवानामनीकानामनुष्ठानं क

सा०१० र्त्यमितिस्वस्थानविवृद्धिः सिद्धा भवति। एवंचक्लृप्तेनोत्तरेण सप्तसु पंचमेषोडहिके त्रयस्त्रिंशेह ह्याग्रयणाग्रदर्शनमुपपन्नं भवति।
४७ जगती वै छंदसां स्विष्टसवरोर्हं ह्याग्रयणाग्रहाव्हहस्त्रिष्टुभि त्रयस्त्रिंशं स्तोममर्हति। इंउक्तदिनवदाहृत्ताव भिल्लवाहारभ्यनवकेरहस्सु
47 संकल्समानेषु उत्तरस्मिन्नपि पसप्तसु एकमहर्व्याप्य अनीकासमाप्यते। ततः पुनरैंद्रवायवाग्राहारभ्यानुष्ठीयमाने द्वितीयमहरैंद्र
वाग्रं। तृतीयं शुक्राग्रं। विश्वजिद्गाग्रयणाग्रं। त्रयस्त्रिंशापहः ऐंद्रवायवाग्रंप्राप्नोति। रयस्थानविवृद्धोपुनः पूर्वस्मिन्नप्सप्त^
स्तिनवधा विभक्तेन वमेभागे आग्रयणाग्रतायामनुष्ठितायामुत्तरेष सप्तस्वावृत्ते प्रातिलोम्येनानुष्ठीयमाने प्रथमभागे ह्याग्रय
णाग्रताभवतितद्दर्शनं चत्रयस्त्रिंशमहरिति तत्र ह्याग्रयणाग्रतादर्शनमुपपन्नं भवति। तदिदं भाष्यकारीयमधिकरण
व्याख्यानं लिंगोपवर्णनं चानुपपन्नं। नद्यत्रचोदकेन अनीकाप्राप्यते। अभिप्लवे हि ज्योतिर्गौरायुरिति नामधेयैरेकाहज्योति
रादिधर्मप्राप्तिः। एकाहेषु चरथंतरसामस्वैंद्रवायवाग्रताबृहत्सामसु च शुक्राग्रताने नाभिप्लवेपि षडहे प्रथमतृतीयपंचमा साम०
नां रथंतरसामत्वादैंद्रवायवाग्रता। द्वितीयचतुर्थषष्ठानां बृहत्सामत्वाच्छुक्राग्रता। ततु अनीकाप्राप्तिः। वोदकादपि बलीयो ४७

नामधेयमित्युक्तं बहुशो भिल्ववविकारात्पैङ्गवामयने हानि। तेन नम्मनीकास्माद्रक्तवावोदकेन म्मनीकाप्राप्तिस्तथापि नव
धा विभागो न युक्तः। न हि द्वादशाहे प्रायणीयोरं न रात्रं नवभिरनीकैः पूरितं किंतु दशभिः। दशमे चैन्द्रवायवाग्रता। ऐन्द्रवायवा
ग्रौ प्रायणीयोदयनीययोर्दशमं चेति वचनात्। अनत्र्यग्रवायनेपि सर्वस्मिन्पक्षस्तिरश्चधा विभज्यमाने दशमो भागऐन्द्रवाय
वाग्रः स्यात्। उत्तरस्मिंश्च पक्षस्तिथा तिलोम्येनानुधीयमाने प्रथमो भाग ऐन्द्रवायवाग्रः स्यात्। नरं नर्गतं चत्रयस्त्रिंशमह
रिति नत्राप्यैन्द्रवायवाग्रतानाम्नासेराग्रयणाग्रतानुपपत्तिः सिद्धान्ते यि स्यात्॥ अपि च पूर्वे हर्द्धमे तान्मनीकायागावाम
यनिके चष्टश्चषउहे नामधेये न द्वादशाहिकचष्टश्चषउ धर्म्मप्राप्तेस्त्रयस्त्रिंशस्याद्भ्य आग्नेयं यणाग्रत्वादिहापि पत्रक्वचिरव
स्थिन स्यापि त्रयस्त्रिंशस्याग्रयणाग्रता भवतीति विपरीतं लिंगं। अन्यानि चद्दषणानि नंत्र रत्न एव दर्शितानीति नेह प्रपंच्य
ते। तस्मात्प्रयावान्ति क्रमधिकरणं वर्ण्यते। सत्संनवोदकेन म्मनीकाप्राप्ते। प्रत्यक्षेणानुवचनेन म्मनीकाविधीयते। ऐ
न्द्रवायवाग्रं प्रथममहरथ शुक्राग्रमथाग्रयणाग्रमथैन्द्रवायवाग्रमथशुक्राग्रमथाग्रयणाग्रमथैन्द्रवायवाग्रमथशुक्राग्र

शा०१० मथाग्नयणाग्रमिति। तत्र संशयः किमेतेन्द्रकलिनवद्वावर्ज्जनीया उत नवधा विभज्य नवस्वपि भागेषु नवानामनीकानां
४८ निवेश इति। तत्र प्रथममहरिति वचनादुत्तरेष्वथ हर्ग्गहणस्यानुषंगात्प्रथमादह्न आरभ्यांत्यादैन्द्रवायवशुक्राग्रयणानां व्यति
षंगेणाग्रत्व मनेन वचनेन विधीयते। ऐंद्रवायवाग्रताशुक्राग्रताग्रयणाग्रतेति त्रिष्वहस्सु। तथापरेष्वपि त्रिषु॥ एवमांतात्कु
र्यादिति वचनार्थमन्यते पूर्वपक्षवादी। सिद्धांतस्तु उद्दिश्यमानस्य भागस्याह्नो वाप्राधान्येन विशेषणासंभवात्प्रथममहरिति
चोद्देश्यं। तत्राह रुद्देशेहर्मात्रोद्देशादर्थेतिनिर्देशानुपपत्तिः। तस्मात्प्रथममैंद्रवायवाग्रमथ शुक्राग्रमित्येतावद्विवक्षितम
हर्ग्गहणं त्र्यहः संघाते। तस्मात्प्रथमादीनां भागानां धर्मः। नवानां चाग्रतानां विधानान्नवधा विभागः। गवामयने च धर्मा विधीयमा
नाश्रवांतरप्रकरणेन पूर्वस्मिन्पक्षसि निविशंते। अतश्च पूर्वपक्षो नवधा विभज्य नवाप्यनीकानि निवेशनीयानि। तत्र चां
त्ये भागेप्याग्रयणाग्रता भवति। उत्तरस्मिंश्च पक्षसि पूर्वस्मिन्पक्षसि विहितं तत्प्रातिलोम्येनानुष्ठेयं। ततश्च प्रथमे भागे राम०
प्याग्रयणाग्रता भवति। तदिदं तर्गनं च पार्ष्ठिकं त्र्यहस्त्रिंशमहरिति तत्राग्रयणाग्रत्वादर्शनमुपपद्यते ऐंद्रकलिनवद्वावृत्तो त्वा ४८

येऽहन्यहनीवर्तयितव्यान्यानीकाम्यारब्धव्यानयोरैन्द्रवाग्नतायामाहस्यविधानात्। आदितो ह्यारभ्यमाणेषु द्वितीयेऽहन्याहत्य
वोदितेनैन्द्रवायवाग्रत्वेन विनिवृत्त्येत। तस्मादेतद्यहनीवर्जयित्वाभिप्लवादिकासु प्रथमारब्धास्विह तत्रारभ्य प्रवर्त्तते। ततश्च पूर्व
स्मिन्पक्षस्यन्तिमे पयोपेसहानामङ्गां परिशेषादसमासेषु न्यनीकाविषुवन्तमुत्तरस्मिंश्च पक्षस्यैकमहर्व्याप्य समाप्यते।
ततश्चासौ पूर्वस्मिन्पक्षसि साकल्येनासंभवन्तीसामर्थ्यात्मकेन लिंगेनावान्तरप्रकरणं वाधित्वा महाप्रकरणे न गवामय
नस्य विधीयमाना न पूर्वस्य पक्षसो विहितेति शक्यं वक्तुं। यत्र पूर्वस्य पक्षसो विहितं तस्योत्तरस्मिन्प्रातिलोम्यमिति तन्त्र
नीकायाः प्रातिलोम्यमित्यानुलोम्येनैवासावान्नास्य वर्तुनइति न पत्रिंशेहन्यैन्द्रवायवाग्रत्वप्रसंगादाग्रयणाग्रतानुपप
त्तिः सिद्धान्ते न विरोधाद्दशादितस्त्वारभ्य प्रवर्त्तते। उक्ते च पक्षसि प्रातिलोम्यं लभ्यत इत्युपपन्नं लिंगं छंदोव्यतिक्रमात्तु यूटे भे।
क्षपवमानपरिधिकपालमैत्रावरुणानां यथापतितं वचनमूहवत्स्यात्। भूतात्मके द्वादशाहे छंदोव्यतिक्रमश्चाम्नातः छंदांसि वा अ
न्योन्यस्य लोकमभ्यध्यायन् गायत्रीत्रिष्टुभस्त्रिष्टुजगत्या जगतीगायत्र्यास्त्विति। तत्र संशयः। किं भक्षणां पवमानानां परिधीनां क

शा.१. पालानांचमंत्रार्थवादेषुगायत्र्यादिशब्दैरभिलपितानांमंत्राणामर्थानांचछंदांस्यतिक्रमयितव्यानिउतमंत्रगतानामेवछंदसां
४८ व्यतिक्रमइतिविशेषाभावात्सर्वेष्वर्थेषुमंत्रेषुचछंदोव्यतिक्रमस्तेनगायत्रशब्दनिर्दिष्टःप्रातःसवनीयोभस्तस्त्रैष्टुभशब्दि
49 तस्यमाध्यंदिनीयस्यभस्तस्यस्थानेमाध्यंदिनेसवनेकर्त्तव्यः।माध्यंदिनीयश्चजागतशब्दितस्यतृतीयसवनिकस्यस्थाने
तृतीयसवने।तार्तीयसवनिकश्चप्रातःसवनेतथाबहिष्पवमानोमाध्यंदिने।माध्यंदिनपवमानस्तृतीयसवने॥आ
र्भवः।पवमानःप्रातःसवने।तथामध्यमःपरिधिःस्थाविष्टोदक्षिणस्यस्थाने।दक्षिणश्चाणीयानुत्तरस्यउत्तरश्चाणिष्ठो
मध्यमस्यस्थानेपरिधातव्यः।तथाष्टाकपालोमाध्यंदिने।एकादशकपालस्तृतीयसवने॥द्वादशकपालश्चप्रातःसवने
कर्त्तव्यः।तथामंत्रगतागायत्र्यादिशब्दाः श्येनोसिगायत्रछंदाइत्यादयस्त्रिष्टुबादिशब्दानांसुपर्णोसित्रिष्टुप्छंदाइत्यादी
नांस्थानेसुपर्णोसिगायत्रछंदाइत्येवमूहितव्याइतिप्राप्तेब्रूमः।मंत्रगतानामेवव्यतिक्रमोनार्थानां।नहितेषांगायत्र्यादिश राम.
ब्दत्वमस्ति।स्तुतिमात्रंतुतेषुगायत्र्यादिभिःनिर्देशः।शक्यतेचैकस्मिन्मंत्रेप्रकाशितंछंदोमंत्रांतरेगायत्र्यादिशब्दप्रक्षेपे ४८

एणप्रकाशयितुं। तस्मान्मंत्रगतानामेव छंदसां व्यतिक्रमः इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां दशमस्याध्या
यस्य पंचमः पादः एकर्चस्थानि यज्ञेषु स्वाध्यायवत्। संति ज्योतिष्टोमे रथंतरादीनि स्तोत्रीयाणि सामानि। तानि किमेकैकस्यामृचि गेयान्यु
त तृच इति संशये स्वाध्यायवेलायामेकस्यामृचि गीतत्वात्तद्वदेव प्रयोगेऽपि यज्ञेष्वेकस्यां भवेयुः। एकं साम तृचे क्रियत इति वर्तमान
निर्देशस्सन्नयं न विधिक्षममिसे तावान्पूर्वः पक्षः। एकसामो वाचेसा घर्थवादविभावितविधिरेकैकं साम तृचे क्रियत इति
वचनात्तृचे गान्यानीति सिद्धांतः। स्वर्दृशं प्रतिवीक्षणं कालमात्रं परार्थत्वात्। रथंतरे प्रस्तूयमाने सम्मीलयेदिति विधाय श्रूय
ते। स्वर्दृशं प्रतिवीक्षेत। तत्र संदेहः। स्वर्दृष्टा दृष्टस्य वीक्षणस्य च कालार्थः संयोगः उतांगांगिसंबंध इति। तत्र कालार्थत्वे स्वर्दृष्टा
दृष्टस्य लक्षणाप्रसंगादंगांगिसंबंध एव न्याय्यः। स्वर्दृक्शब्दो वा वीक्षणांगं स्वर्दृक् दृष्टं समुच्चारयन्वीक्षेत। नान्यथेति। वीक्षणं वा स्व
र्दृष्टस्यांगं वीक्षमाणः स्वर्दृक्शब्दमुच्चारयेन्नान्यथेति प्राप्ते ब्रूमः। अनपेक्षितसंबंधानां वाक्यभेदप्रसंगतः। न युक्तोंऽगांगिसंबंध
स्तस्मात्कालार्थता वरं। अपि च सकृदेशो हि स्वर्दृक्शब्दः दृष्टस्तु सर्वत्वान्न वीक्षणं प्रयोजनमपेक्षते। स्वर्दृक्शब्दः कर्तृवचनत्वाद्धि ति

शा·१० यं न त्वाच्चनोनुमदृष्यनेन संवध्यमानः स्तुतिमेवालमभिनिर्वर्तयितुं न वीक्षणं प्रकाशयितुं । तथा वीक्षणमपि रागप्राप्तं
५० दृष्टेनैव प्रयोजनेन निराकांक्षं न स्वर्दृक्छब्दांगतया विधातव्यं । संमीलनविधिनाचावधिप्रतिपादनेनैकार्थ्यसंभवान्नवाक्या
न्तरत्वमवकल्पते । प्रतिशब्दश्च स्वर्दृक्छब्दस्य पक्षे वलक्षणमामावष्टे । अतः काललक्षणैव व्याप्ता । तेनायमर्थः । रथंतरे भस्तूय
50 माने संमीलयेदास्वर्दृक्छब्दोच्चारणात् ॥ तस्मिंस्तु काले वीक्षेतेति । दृष्ट्यस्य युगपद्विधेरेकाहवद्विसामत्वं द्वादशाहे दृष्टव्यः पृष्ठ्यः षडह
उत्पन्नः । तत्र षण्णामथाङ्गां क्रमेण रथंतरबृहद्वैरूपवैराजशाक्वररैवतानि पृष्ठसामानि । गवामयनादिषु अयने दृष्टव्यः षडहो
बृहद्रथंतरसामा कार्य इति । तेन वैरूपादिकं निवर्तते । बृहद्रथंतराभ्यामेव पृष्ठस्तुतिर्निर्वर्तयितव्या । तत्र संशयः किमेकैक
स्मिन्नहनि द्वंद्वे सामानां उत ऋक्विनद्बृहन्ऋचि रथंतरमिति । तदर्थमिदं विचार्यते । किं बृहद्रथंतरसामेति द्वंद्वगर्भो बहु
व्रीहिः बृहच्च रथंतरं च बृहद्रथंतरे इति प्रथमं द्वंद्वं कृत्वा पश्चाद्बृहद्रथंतरे सामनी अस्य सोऽन्यपदार्थे बहुव्रीहिः उताहो स्विद्द्वंद्वम राम·
नेकपदबहुव्रीहिः बृहच्च रथंतरं च सामास्येति । तत्र द्वंद्वगर्भस्य पूर्वोत्तरपदे निसमासवचनमिति कारणाय नवचनादेवंविध ५०

येद्वंद्वस्यनिमत्त्वात्कुत्सैवद्वंद्वंऊबहुव्रीहिः। तेनेनरेनरयुक्तयोः साम्नोः षडहसंबंधात्रैकंप्रयोक्तव्यं नत्रेनरेनरसहितमेवकार्य
मितिसेवमवमवगमादेकैकमेवाहोद्वहद्वयंनरसामकंकार्यमितिप्राप्तेब्रूमः। क्वचित्किंचित्स्यात्। एवमेकैकस्येनरेनरनिरपे
क्षस्यप्रापकश्चोदकोनुग्रहीतोभवति। नचवचनविरोधः। यद्यपिनावद्वंद्वगर्भोबहुव्रीहिःस्यात्तथापिषडहापेक्षत्वेननरेनरयो
गोद्वंद्वेनावम्यतेनषडहावयवापेक्षः षडहापेक्षश्चनरेयोगः क्वचित्कस्यचिन्निवेशेपिनविरुध्यते। तत्रयदिविभागेननिवे
शप्रमाणंनस्यात्ततःसर्वत्रेनरेनरयोगःस्यात् अविशेषात्॥ अस्तितुप्रमाणंचोदकः। तस्मादेकस्मिन्नहन्येकस्मिन्नरस्मिंश्च
नरस्प्रयोक्तव्यं। नचावश्यंद्वंद्वगर्भोयंबहुव्रीहिःविभाषावचनेनद्वंद्वस्यानित्यत्वात्॥ कात्यायनीयंतुवचनंशब्दानुशासनपरत्वादन
सतोद्वंद्वेनसुहृषयोरन्यछद्द्रूपंप्रसक्तोऽश्वाम्यद्भवतिनत्वसमासकृतरूपनियमार्थं। तद्यथा। वाक्त्वचप्रियः पंचगवधनइत्यत्र
द्वंद्वेनसुहृषयोरकरणोवाक्त्वक्प्रियः पंचगोधनइतिप्रवृत्तावपिसमासांतंप्रयोगःप्रसज्येत। तद्व्यावृत्त्यर्थंनित्यसमासवचनं
। द्वंद्वहृदयंनरसामेसादिपुन्तुद्वंद्वधापिसन्यप्रस्याभेदात्प्रायतोऽर्थोनिर्णीतव्य इतिप्रसेकप्रायिचोदकानुग्रहैहोयानेकपदबहुव्रीह्या

शा.१. श्रयणं। तस्मात्किंचित्किंचिद्विषयोक्तव्यां न प्रसहं देहेस्यानां। समासस्त्वेकादशिनेषु तस्य कृतित्वात्‌ ॥ द्वादशाहे श्रयणे। एकादशि
५१ नान्प्रायणीयोदयनीययोरतिरात्रयोरालभेरन्निति। तत्र किं सर्वैः प्रायणीये सर्वैरुदयनीये आलब्धव्या उत विभज्य केचित्प्रायणी
ये केचिदुदयनीय इति संशये। प्रायणीयोदयनीययोः प्रधानत्वेनोद्देश्यत्वात् द्वंद्वावगमनसाहि सस्याविवक्षितत्वा च नानुप्रधानमेका
5 दशिनामालब्धव्या इति प्राप्ते ब्रूमः। द्वादशाहप्रकरणे प्रागेव वचनांतरेणैकादशिनी विहिता प्रकरणाद्द्वादशाहांगत्वेनावगता
सानुष्ठानव्यासक्तीकृपदेशमालब्धव्येस्य पेक्षायां देशविधित्सायां प्रायणीयोदयनीयौ श्रूयेते। न प्रधानान्तया। द्वादशाहस्य प्रधानस्याव
गमात्। देशश्चांगं। नच प्रसंगमावर्त्तते प्रधानं। तस्माद्विभज्यालंभः ॥ सर्वपृष्ठेष्टिः पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य हुतदेशत्वात्। पाढे
विश्वजित्सर्वपृष्ठो भवतीति श्रूयते तत्र षाड्‌हिकानां रथंतरादिपृष्ठानां विधिरिति स्थितं सप्तमे। तत्र संशयः। किं षण्णामपि सामानां पृ
ष्ठस्तुतिसाधनत्वं। न तत्र पृष्ठदेशे माध्यंदिनपवमाने मैत्रावरुणसाम्नो मध्ये निवेश उत वैरूपस्यैव तत्साधनत्वेन तत्र निवेशो मे शा.म.
षांस्तोत्रांतरसाधनत्वेन तत्तद्देशे प्रयोग इति। तत्र षड्‌हेनेषां पृष्ठसाधनत्वेनेहापि पृष्ठशब्देन तत्साधनत्वावगमात् पृष्ठदेश एव प्रयो ५१

स्त गः सर्वेषामिति निप्रासेवमः। रथंतरं वहिः पवमाने कुर्यात् गर्भे वै बृहन्मध्यनराणि वैरूपं होतुः इष्टद्रसादि वचनाद्वैरूपस्यैव इ
ष्टसाधनत्वं। इतराणि स्तोत्राणि तरसाधनानि। न च इष्टस्तेनोप्रयुक्तानामेव पुनर्वचनात्स्तोत्राणां नैरपि प्रयोगोऽस्त्विति वाच्यं।
वैरूपस्य इष्टविधेरानर्थक्यप्रसंगात्। किं च। सर्वइष्टशब्देनत्र स्वर्णया इष्टसाधनभूतानि रथंतरादीनि साम्नानि षाडहिका
नि विधीयंते। स्तेन बहुत्वाभावेन सर्वशब्द विषयत्वासंभवात्। तेषां च साम्नामिहानिर्दिष्टानां कार्याकार्यांशि णां वाचनिके
रेवकार्यैरुपपत्तो कोनाम सर्वेषां इष्टसाधनत्वं कल्पयेत्तस्मादिभजैव निवेशः। वैरूपसामाक्रतुसंयोगात्त्रिवृद्वदेकसामास्या
त्। उक्थ्येवैरूपसामा एकविंशः षोडशी वै राजसामा सत्रे किं वैरूप वैराजयोः साम्नोः सर्वेषु सामकार्येषु निवेशः उत इष्टस्तो
नावेवेति संशये। विशेषाग्रहणात्सर्वेष्विति प्राप्ते प्रकृतावेवंविधस्यानिर्देशस्य रथंतरसामाद्वहत्सामावेति इष्टविषये
इष्टत्वादिहापि तेन प्रकृतिलिंगेन इष्टस्तेनेर्बुद्धावारोहात्तद्द्वारेण च साम्नोः क्रतुसंबंधोपपत्तेः इष्टसाधनस्यैव रथंतरादेर्वि
कारो वैरूपादिः त्रिवृतिसंख्यालात्सर्वसंख्यानाक्षर्वसंख्याविकारः स्यात्। त्रिवृद्वद्वहिष्पवमानः इति श्रूयते। त्रिवृच्छब्दोयंत्रैगु

शा॰ १ एषवचनोल्लोकसंख्यातत्त्रिवृदनुरित्यादौवेदेचरणेनात्रिवृद्वतीतिप्रयोगादवगतः स्तोत्रीयानवकवचनोपिवेदेऽवगतः

५२ त्रिवृद्धिष्पवमानमित्युक्तास्तोत्रीयाणांनवानामनुक्रमणात्। नदेवमुभयार्थत्वेसतियत्रत्रिवृदग्निष्टुदित्यादौवाक्यशे

षादर्थविशेषोनावगम्यतेतत्रविचार्यते। किंत्रैगुण्यवचनःसन्सर्वेषांक्रतुसाधनानांसंख्याविकारः।उतस्तोत्रीयानवकवचनः

सन्स्तोमस्यैवविकारइति। तत्रशास्त्रस्यमहाविषयत्वसिद्ध्यासर्वद्रव्याणांत्रैगुण्यविधिरितिप्राप्तेब्रूमः।त्रैगुण्यंपशुसो

मुवन्नवयवप्रसिध्याब्रूयात्।नञ्जुवस्तोत्रीयानवकंसाचवलीयसीतस्मात्स्तोत्रीयासंख्याविकारस्त्रिवृत्त्वं।उभयसाम्निविश्वजि

द्धिभागःस्यात् यत्रसंसवासावुभेहदथन्तरेभवतइतिश्रुतंतत्रकिमुभयोःपृष्ठसाधनत्वंउतैकेनपृष्ठमितरेणस्तोत्रान्त

रसाधयितव्यमितिसंशये। चोदकेनवैकल्पिकत्रिकपृष्ठप्राप्तेस्तदनुग्रहायैकमेवपृष्ठसाधनमितरत्तुसामविश्वजिद्वत्स्तो

त्रान्तरेपिस्यात्।नैवं विश्वजितिवाचनिकःकार्यान्तरेनिवेशोनत्विहतादृग्वचनमस्ति।येनकार्यान्तरेनिवेशःस्यात्।तेनविकल्पे राम॰

नप्राप्तयोःपृष्ठयोःसमुच्चयमात्रंवचनेनक्रियते।चोदकवाधस्तुस्तोत्रान्तरसाधनत्वेपितुल्यः। तस्मात्पृष्ठएवनिवेशः।पृष्ठेरथ ५२

भोजनमाहृते संस्थिते त्रयस्त्रिंशेहनि स्यात्तदानन्तर्यात्प्रकृतिवत्॥ द्वादशाहे त्रिवृत्पंचदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंश
इति षडहं विधाय श्रूयते। संस्थिते पृष्ठ्ये षडहे मध्वाशयेत् घृतं वेति। गवामयनादिषु पृष्ठ्यषडहस्य प्रातिलोम्यं विहितं।
पृष्ठ्यः षडहस्त्रयस्त्रिंशारंभणस्त्रिवृदुत्तमः कार्य इति। तत्र किं त्रयस्त्रिंशेहनि संस्थिते मध्वशनमुत षडहान्त इति।
तत्र त्रयस्त्रिंशेहनि प्रकृतावनुष्ठितत्वात्तदनंतरं मध्वशनं मन्वानः पूर्वानुष्ठिते त्रयस्त्रिंशे तदनंतर एव मध्वशनं मन्यते। सिद्धां
तस्तु द्वादशाहांगताप्यस्य गम्यते प्रक्रियावशात्॥ वाक्याद्धि षडहांगत्वं त्रयस्त्रिंशांगताक्रमात्॥ अनुष्ठानसंनिधिलक्षणो हि
क्रमेण त्रयस्त्रिंशांगतामध्वशनतामध्वशनस्य स्यात्प्रकरणात्तु द्वादशाहांगत्वं षडहांगत्वं षडहांगत्वं समभिव्याहाराद्वा।
तत्र सत्यपि संस्थाशब्दे वैमृधवत्पौर्णमास्यां षडहस्यैवांगं। षडहावसाने च विधीयते न त्रयस्त्रिंशावसाने। तस्मात्षडहान्ते स्या
त्। अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात्। यत्र षडहस्य पुनः प्रयोगः तत्र किं मध्वशनस्य पुनः प्रयोगः उत सर्वाभ्या
सान्ते सकृदिति संशये षडहांगत्वात्तदावृत्तावावृत्तिः। षडहसंस्थायाश्च पुनः पुनर्भावात्तन्निमित्तं मध्वशनमावर्तनीयं। नैवं।

शा.१० संस्थानामतद्विषयव्यापारोपरमः। पुनः प्रवर्त्तमानस्य च नोपरमोऽस्ति। तस्मात्तत्सप्पंगत्वे निमित्ताभावान्नावृत्तिः। अंगत्वा
५३ निराकरणं तु भाष्येति शयोक्तमिति नातीवादर्त्तव्यं॥ अथ नित्यवाये कालभेदात्तस्मात्। यत्र गवामयनादावभिप्लवादिभिर्व्य
वेनस्य षडहस्याभ्यासः तत्रापि किं सर्वत्र मधुश्नं उत स्वभ्यास्तमिति। पूर्वोक्तान्यायेन सर्वत्रान्तदृतिमाप्त उच्यते अत्र षड
हादुपरम्यैवाभिप्लवादिषु व्याप्रियते। न तु पूर्ववदनुपरमः। तस्मान्निमित्तभूतसंस्थावृत्तेर्नैमित्तिकस्य मधुश्नस्यावृ
त्तिः मधुनदीक्षितानां ब्रह्मचारित्वात्। सत्रमहीनश्च द्वादशाहः। तत्र सत्रे मधुश्नं कर्त्तव्यं नेति संदेहे यजमानानामेव स
त्रे दीक्षितानाम् विकल्पात् दीक्षितस्य च ब्रह्मचर्यविधानात् ब्रह्मचर्यविधानात् ब्रह्मचारिणश्च मधुप्रतिषेधात् कर्त्तव्यं सत्रे
मधुश्नं। न च वैगुण्यं। घनाणेनेनसाद्गुण्यसंभवात्। मधुश्नं चाहीनविषयं भविष्यतीति प्राप्ते अभिधीयते॥ यत्त्वावृत्त
तिपद्दोक्तो मधुव्रतानप्रतिषेधो ब्रह्मचारिणः स नु पुरुषार्थो न क्रत्वर्थं बाधितुमर्हति। विषयभेदात् यस्तु ज्योतिष्टोमे दी
क्षितस्य क्रत्वर्थत्वेन ब्रह्मचर्यविधानादिहापतिदेशेन क्रत्वर्थं न या ब्रह्मचर्यप्राप्तेर्ब्रह्मचारिधर्म्मगतो मधुश्नप्रति राम. ५३

षेधः कृत्वर्थनयाप्राप्तः सप्तदशविहितं मध्वशंसनं नाहीनविषयत्वेन संकोचयितुमर्हति। वरमतिदेशस्यैवानुमानि
कस्यांगांतरेषु संकोचः। तस्मात्तत्रैव मध्वशंसनं स्यात्। ७ मानसमहरंतरं स्याद्वादशाहव्यपदेशात्। द्वादशाहे दशमस्या
ह्नोधिकारे मानसो ग्रहः श्रूयते। अनया त्वा पात्रेण समुद्रं रसया प्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृह्णा
तीति। तत्र संशयः। किमहरंतरचोदनेयं यागांतरचोदनेत्यर्थः। उत्तरं दशमस्याह्नोंगभूतं ग्रहाभ्यासात्तरं चोदयतीति
। तत्र वा एवं द्वादशाहो मनो मानसमित्यादिभिर्व्यपदेशादिभिर्हेतुभिर्यागांतरशंकायामुच्यते। व्यपदेशभेदादेव घवा
वयत्तेर्ग्रहणे चोदनानां चाचोदकाश्च संस्कारा इत्यनेन संस्कारमात्रपर्यवसायित्वेन यागांतरकल्पकत्वाभावात् दशमेहनि
मानसाय प्रसर्प्पेतीत्यादिदर्शनेश्च दशमस्याह्नोंगग्रहाभ्यासांतरं नाहरंतरं। सत्रमेकः प्रकृतिवत्। सत्राणि किंकामिन
एवैकैकशः कुर्युः। उत बहवः संहत्येति चोदकानुग्रहाद्बहुवचनस्य चैकैकशोपि लोके बहवः कामिनः सत्रं कुर्वंतीत्यनेना
भिप्रायेणानुवादत्वोपपत्तेरेकैकशः कुर्युः। नैवं प्रारब्धानगनाहिकर्तृसंख्याप्रकृतिवदिहापि प्रयोगांगं गनया विवक्षिता

शा०१० नहितस्याः किंचिद्विवक्षाकारणमस्ति।साचचोदकप्राप्तमेकत्वंबाधते।तस्माद्बहवः प्रयुंजीरन् अथेष्वृत्विजः प्रकृ
५४ तिवत्।सत्त्रेष्वेवकिमन्यैरार्त्विज्यंकर्त्तव्यंउतयजमानैरेवेतिसंदेहेचोदकानुग्रहादन्यैः।येयजमानास्तत्रऋत्विजइतिव
चनंयच्छ्रोपवद्यजमानोद्देशेनतत्संस्कारार्थतयार्त्विज्यविधिः नत्वार्त्विज्येयजमानविधिः।तेनार्त्विज्यमन्यैःका
र्यंयद्वाध्वर्युर्गृहपतिंदीक्षयित्वेत्यत्रऋत्विजांसंस्कारार्थेनदीक्षाविधीयतइतिनयोगादृत्विगेवयजमानशब्दगो
चरइत्यनुवादः।नैवं।अप्राकृतकार्यत्वप्रसंगात्।वचनानर्थक्याच्च।नवार्त्विज्यस्ययजमानसंस्कारत्वं।अप्राकृतका
र्यत्वप्रसंगादेव।तस्मात्प्राकृतकार्यस्यैवार्त्विज्यस्ययजमानाःकर्त्तारोविधीयंते।अतोन्येषांचोदकप्राप्तानांबाधः॥द्वाद
शाहस्यसत्त्रत्वमासनोपायिचोदनेनयजमानबहुत्वेनचसत्त्रशब्दाभिसंयोगात् यजतिचोदनादहीनत्वंमितांवास्थित स्वा०२
परिमाणत्वात् सत्त्रप्रसंगात्द्वादशाहगतस्यसत्त्रस्वरूपस्यलक्षणंनप्रसंगाच्चतद्गतस्यैवाहीनरूपस्यलक्षणंसूत्र
रूपेणोच्यते।तत्रत्रयोदशरात्रादिष्वासनोपायिचोदनेषुवेदेध्येत्वप्रयोगेषुचसत्त्रशब्दप्रयोगात्द्वादशाहेपिप्रयु राम०
५४

ऽयमानस्य सत्रशब्दस्य तन्निमित्तता। द्विरात्रादिषु च यजतिचोदनेष्वहर्गणेष्वहीनशब्ददर्शनाद्द्वादशाहे पि तदेव तस्य नि
मित्तं ॥ छ ॥ अहीने दक्षिणाशास्त्रं गुणत्वात्प्रत्यहं कर्मभेदात्स्यात् ॥ छ ॥ पौण्डरीको नामाहीन एकादशरात्रः। तत्र श्रूयते अयु
तं दक्षिणा ऽश्वसहस्रमेकादशमिति। तत्र संशयः किमयुतमश्वसहस्रं च प्रत्यहं दातव्यं उतैकमेवायुतमश्वसहस्रं च [redacted]
दातव्यमिति। तत्र। दक्षिणाग्रहणं गत्वात्प्रत्यहं भेदमर्हति। एकप्रयोगयानानुतन्त्रेणैकाप्रदीयते। सत्यं प्रत्येकमङ्गाम
गं दक्षिणा न यापि कर्त्रानतिद्वारत्वात्कर्तृणां च विकीर्षितार्थमुपादानादेकप्रयोगचोदितानामेकादशानामप्यङ्गा
युगपद्विकीर्षितं चातन्त्रेणैव सर्वेषां पुनुषाणामुपादानं। तदानतिश्चैकैव तन्त्रेण। तत्सिध्यर्था च दक्षिणापि तन्त्रेण
संभवादेकैव दीयते। ननु पौण्डरीकप्रकृतौ द्वादशाहे प्रत्यहं दक्षिणा प्रत्यहं द्वादशशतं ददातीति वचनात्तेनेहापि द्वाद
शशतविकारो युतमश्वसहस्रं च प्रत्यहं भेदमर्हति। उच्यते। द्वादशाहे प्येकप्रयोगत्वादेकैवानतिरिति प्रत्यहं द्वादश
शतेन दीयमानेयावनीभवनीनावनीर्दक्षिणैकैव। तस्मादिहाप्येकमेवायुतमश्वसहस्रं दातव्यं ॥ प्रत्यहं सर्वसंस्कारः प्रकृति

श्रा॰ १॰ वत्सर्वासांसर्वशेषत्वात् प्रकृतौ माध्यंदिने सनैवेदक्षिणानयनं श्रुतं। पौंडरीके चायुतमश्वसहस्त्रं माध्यंदिने सवने प्र।
५५ सहं नेतव्यं उतैकस्मिन्नहनि अथवा विभज्य प्रसहं सहस्त्रं नेतव्यं अश्वसहस्त्रं चैकादशे द्विने पमिति संशये। प्रकृतावाम्नी
घमाध्यंदिने सवने नीनेतीहापि प्रतिकर्मावसाधीचोदकः प्रतिमाध्यंदिनं नयनं प्रतिपादयति। समस्तावेयं सर्वेषा
मह्नां दक्षिणेति सर्वैव प्रसहं नेतव्या। दक्षिणासंस्कृतत्वान्न धनस्य सकृत्संस्कृताया अवनपुनः संस्कारेण प्रयोजनमिसे
कस्मिन्नकस्मिंश्चिन्माध्यांदिने नयनं। नैवं। द्वादशाहे हि विभज्य नयनं विहितं अन्वहं द्वादशशतं दद्यातीति। तेनेहापि
नहदेव विभज्य नयनं ॥ लिंगेन द्रव्यनिर्देशे सर्वप्रसयः सालिंगस्य सर्वगामित्वादाग्नेयवत् क्वचिद्विकृतौ श्रूयते। म
नोर्मचः सामिधेन्यो भवंतीति। तत्र किं सर्वा एव मनोर्मवः सामिधेनीत्वेन वक्तव्या उत यावतीभिः संख्यापूरणं प्राकृ
तीनां वस एवेति। प्रसस्ते एवचनेन सर्वासामविशेषेण प्राप्तवगमाच्चोदकप्राप्तसंख्याबाधेन सर्वासामुपादानमि राम॰
सेनावान्यूर्ध्वः पक्षः। नावश्यं प्रसस्तवचनेन सर्वासां प्राप्तिः। नहीदमकुसंस्कारार्थं अग्निसमिंधनार्थं मन्त्रर्वं उपादीयं ५५

ने। तत्र बहुवचनात्त्रित्वे प्राप्ते त्रित्वमतिक्रम्य पंचदशोपाहीयंते॥ अधिकानां त्वनाशंकमेवोपादानं वाससि मानो
पावहरणं प्रकृतौ सोमस्य वचनात् ज्योतिष्टोमे सोमस्य मानमुपावहरणं च वासः साधनकं। वाससि मिनोति वाससो
पावहरतीति वचनादिसुत्तरविवक्षया प्राप्तिः क्रियते। तत्राहर्गणे अर्थाद्वासः प्रकृतिः स्यात्। स्थितं वाससि मानं वाससा
चोपावहरणमिति द्वादशाहादावहर्गणे किमुपावहरणार्थं प्रत्यहं वाससो भेदः स्यादुत नेति। भेदे प्रमाणाभावान्नेति
प्राप्ते ब्रूमः। अर्थाद्वाससो भेदः स्यात्। अहर्विद्धौ नैककेवल स्थितः सोमः प्रत्यहं भेदेनाभिषवार्थं ग्रावानेकस्याङ्कः पर्याप्तः
तावान्वाससोपावहर्त्तव्यः। अवशिष्टश्च शकट एव वाससोपनद्धो वर्तिष्यते। तस्मादर्थादहर्भेदे वाससो भेद उपावहरणा
र्थमुत्सादयितव्यं मानं प्रकृत्या दश्येत प्रकृतौ नेनदर्शनादुपावहरणस्य प्रदेश उपावहरणार्थमन्यद्वास उत्साद्यते।
तत्किं मानकाल एवोत्साद्यं उतोपावहरणकाल इति संशये। प्रकृतौ यस्मिन्वाससि क्रयकाले मानं कृतं तेनैवाभि
षववेलायामुपावहरणस्य दर्शनादहर्गणेपि मानवाससोपावहरणेन भवितव्यं तस्मान्मानकाल एवोत्साद्यं ने

शा·१· वं। आर्थिकं हि प्रकृतौ मानवाससस्सोपावहरणं। न शास्त्रीयमेतावद्धि अयनेवाससोपावहरणीति। तत्र प्रकृतौ यस्मि
५६ न्वाससि सोमो मित उपनद्धः प्राक्क्रयेस्थापितः तेनैव सोऽकर्याउपावहरणमनुष्ठितं॥ अहर्गणे तु मानवेलायामनुपपत्त्यभावा
देकस्मिन्नेव वाससि सर्वेषामह्नां सोमे मितोपनद्धस्थापिते अभिषववेलायामुपावहरणार्थमनुपपत्तिवशाद्भिन्नदुसाधने।
56 इति शास्त्रदीपिकायां दशमस्य षष्ठः पादः॥ पशोरेकहविष्ट्वं समस्तचोदितत्वात्॥ अग्नीषोमीयं पशुमालभेतेत्यत्र संशयः। किं
कृत्स्नः पशुरेकं हविस्तेन चरेद्वतापेदीयमानेन पयो विक्रियते तन्न एव वावदाय होमः। उत पश्वंगं हृदयादि हविरिति। तत्र।
न छिन्नेन पशोरेव देवतायां प्रचोदनात्। समस्तस्य पशोर्हानमेकस्यायसो यथा। हृदयस्याग्रेऽवद्यति अथ जिह्वाया इत्याहि निव
चनानि पशोरेवावदानप्रदेशलक्षणार्थानि मध्यपूर्वार्द्धवचनवत्। हृदयप्रदेशे वपनीसेकादशानां च प्रदेशानामुपदेशा
त्तदवदानमयोग्यत्वादशक्यत्वोवदाय ह्रयते। तस्मिन्नेव च काले समस्तः पशुर्देवतायै त्यज्यते। पुरोडाश एव च तस्मात्पशुरेकं राम·
हविरिति प्राप्ते ब्रूमः। स्वंज्ञनं प्राकृतार्थं हित्वा यादिषु दृश्यते। तस्मात्तत्प्रकृतित्वेन देवतासंगतिः परा॥ हृदयादिप्राप्ता हि मांसवि ५६

शेषत्ववचनानुयुक्तं यस्मात्पशुप्रदेशलक्षणापर्यन्तां नीयन्ते हृदयादीनामेवावदानोपपत्तेः। अवदानं च प्रकृतौ हविःसंस्कारार्थमिती
ह्यवदानं हविष एव युक्तं। न च हृदयादिषु हविष्ट्वन इति हृदयादीनामेव हविष्ट्वं निश्चीयते। न चोत्पत्तिवाक्यशिष्टपशुत्वरोधः।
तस्य हृदयादिप्रकृतित्वेन यागसाधनत्वेऽपि देवतासंबंधोपपत्तेः। यदि हि मानाभ्यां प्रमाणं न स्यात् ततः पशुरेव साक्षाद्दीयेत। अ-
स्ति तु प्रमाणं हृदयादिष्ववदानवचनं विशसनवचनं च। तस्माद्धृदयादीनि हवींषि देवतायै देयानि त एव चावदानं गृहीत्वा
हूयते न स्वकृतिश्च पशुः हविर्भेदात्कर्मभेदोऽभ्यासस्तस्मात्तेभ्योऽवदानं स्यात् यश्चांगानि हवींषीति छित्वा विशसने किमेकेनैके-
न चिदंगेन यागः कर्त्तव्यः। उत सर्वैरंगैरथवा हृदयादिभिरेकादशभिरिति। तत्र एकेनापि पशोर्यागसाधनत्वोपपत्त्वोपपत्ति-
तः। तन्मात्रेणैव यागः स्यात् सर्वैर्वा युगपन्मतेः। पश्वाकृतिर्हि देवतासंबंधित्वेन श्रुता तेन न तया परिच्छिन्नेन द्रव्येण यष्टव्यं
सा चावयविरूपं सा साक्षात्परिच्छिनत्ति। तस्य विशसनादिविधानात् न साक्षात् यागसाधनतासंभवतीति तदवयवानामवयवि-
द्वारेण पश्वाकृत्या परिच्छिन्नानां साधनत्वं। अवयवी चावयवेषु व्यासज्य वर्त्तमानः सहैव सर्वावयवेषु धियमादधातीति न जातिरि

शा॰ १॰ व्यक्तिषु प्रसक्तमनोऽविशेषतः सर्वैरप्यैश्वर्यं। हृदयादिवचनं तु द्यवदाननियमार्थम् एवं हि श्रूयते। एकादशैव पशोरवदाना
५७ नीतिनानि हि द्विरवद्यतीति नियमश्च नैवं। एकादशैवावदानानि नाधिकानीति किं तर्हि यान्येकादशनानि द्विरवद्यतीति
नाधिकानीति नेनाधिकानां प्रागानि पशोः पंचावदानवचनात्त्रिस्त्रिरवद्यन्ते तस्मात्सर्वेभ्योऽवदेयं। नैतदेवं। अविशेषा
द्धि सर्वेषां हविस्त्वमवगम्यते।। अवदानवचोभ्यस्तु विशेषोऽत्रावधार्यते। यदा हि हृदयादीनामवदानवचनेन हविष्ट्व
मवगतं तदानस्य कृतित्वे नैव पशोर्देवतासंबंधोपपत्तेर्न किंचिदङ्गान्तराणां हविष्ट्वप्रमाणमस्ति न च हि संख्यार्थं हृदया
दिश्रवणं भिन्नवाक्यत्वात्। हृदयस्याग्रेऽवद्यति अथ जिह्वायाः अथ वक्षस इत्यादीन्यवदानविधानानि। एकादशैव प
शोरवदानानि नानि द्विरवद्यतीति संख्याविधानं तस्माद्धृदयादिभ्यः परिगणितेभ्योऽवदानं नाधिकेभ्यः इत्याशेषात्
स्विष्टकृदिज्यानस्य कृतिवत् पशावेव चोदकप्राप्तः स्विष्टकृद्यागः किंप्रधानहविर्भ्यो हृदयादिभ्यः उत्तरार्द्धं गृहीत्वा कर्त्तव्य राम॰
उतांगानेभ्य इति संशये। प्रधानशेषप्रतिपत्त्यर्थत्वात् प्रकृतौ पशावपि प्रधानशेषेभ्यः कर्त्तव्यः।। अंगैः स्विष्टकृतं यज ५७

नीतिवचनं चोदकप्राप्तेषु सर्वेषु प्रधानहविःषु त्रित्वविधानार्थं तेन तेषामेव मध्ये त्रिभिः स्विष्टकृदिज्येति प्राप्ते क्रमः। त्रित्वं
नांगानुवादेन विधातुं शक्यं तेन यथा। तस्य प्रसरभेदेन सामर्थ्यं हि विहन्यते। एकं हीदं संसमासपदं त्र्यंगैरिति। नदेकप्रस
रं पुक्तं। सकलमुद्देश्यकमुपादायकं वाउत्तरार्द्धं न द्विःष्य पूर्वार्द्धे विधीयमाने प्रसरभेदात्सामर्थ्यविघातात्समासो न स्यात्॥
अपि च दोः पूर्वार्द्धस्य गुरुमध्यनः श्रोणिं जघनार्द्धस्येति वाक्यशेषे ऽनिज्याशेषाणां कीर्त्तनादिस्विष्टमनिज्याशेषाणां विधा
नं। तेश्वप्रसाम्नानाद्धि ज्याशेषाणां बाधः। नन्वनिज्याशेषाणामंगत्वेन विधानादिज्याशेषाणां चोदकेन प्रतिपादनेन प्रधा
नतया प्राप्तानां विषयभेदाद्युक्तो बाधः प्रधानभूतानामपि निर्वर्त्तकत्वात्तस्मिंश्चांशे निज्याशेषाणां विधानाद्दार्थिकमस्त्येव तुल्यवि
षयत्वं। न ह्यनिस्याशेषैः क्रियमाणो यागस्तेषां प्रतिपत्तये लं भवति। तेन गुणाभूतैरपि युक्तः प्रधानबाधः किं वानिज्याशेषाणा
मपि हृदयाद्यर्थत्वं पश्वनुनिष्पन्नानामाकीर्णीकरणेनांप्रतिपसपेक्षता चोदकेनेज्याशेषप्रतिपसर्थनया प्राप्तः स्वि
ष्टकृद्यागस्तत्प्रतिपत्तौ वचनेन विनियुज्यते। यस्तु स्विष्टकृता प्रतिपादनं तदंगानि हृदयादीनि। तस्माद्युक्तो बाधः अथ भी

अध्यायद्भुरसोमांस
भितध्वर्तस्वामी

श्रा० १० होतुस्त्वं गवदिज्जाभस्य विकारः स्यात् पश्चादेव श्रूयते अद्ध्वर्यु ध्रूध्रीहोत्रे हरंतीति। सेयम ध्रूध्रीकिं प्राकृतस्य होतुरिज्जाभस्तस्य विकार
५८ ष्ठतेनेति। यद्यत्संज्ञाप्राप्त्या ध्रूध्रीयं विधीयते ततो विकारः। अथ यदस्ते होतुः प्राप्तासती नियम्यते ततोऽविकारः। तत्रानस्थिभिरि
ज्जं वर्द्धयंतीति वचनादिज्जायामंतर्गता ध्रूध्रीज्जायांअस्ति अग्निर्विभज्य भक्ष्यमाणो यावद्दाविड्डो न भागेस्यात्कदाचिदन्यस्य भागे सा हो
तभागे नियम्यते। ततो घृजुर्युक्तरथवन्नैज्जाभस्य विकारः उच्यते॥ अनस्थिभिरिज्जं वर्द्धयंतीति वर्त्तमानापदेशस्य रूपत्वादनुवादो
पं। कथं प्राप्तिः अथ यस्य सरि शिष्टं तत्तमवत्तधा इडापात्रे न्यामानयंति यद्दद्दयं प्राप्स्यति ह्नांवद्दास्तत्त्रिषम ततस्तस्यैव वनिष्ठुमिति तिनचनतम ध्ये
ध्रूध्रीकीर्तिता। तस्मादप्राप्तानेन नैव वचनव्यक्तिः पद ध्रूध्रीहरंतीति तद्धोत्रे ददाति। किं तर्हि यद्धोत्रे हरंति तद ध्रूध्रीमिति प्राक्के
तं होतुः संप्रदानकं हरणम ध्रूध्रीप्रतिपादने विनियुज्यते तस्मादिज्जाभस्य विकारः आग्नीध्रश्च वनिष्टुर ध्रूध्रीवत् तत्रै
व श्रूयते। वनिष्ठुमग्नीधे हरंतीति तत्रापि पूर्ववदेव संशयपूर्वोत्तरपक्षाः। विशेषाशंकानु वनिष्ठोरिज्जायां प्राप्तसन वच राम०
नादस्ति प्राप्तिरिति। सत्यमस्ति प्राप्तसनं तत्विज्जासंस्कारार्थे उपस्तरणादिवत्। अतो नास्येज्जात्वं तत्र भक्षसंयोगोऽस्य भक्षयितुं ५८

वनिष्ठुर्वपासन्निहितत्वात्तस्य इज्जामांस
विशेषः॥ धूर्तस्वामी तु स्थापितरात्र
विशेष इत्याह

58

प्रास्यतीति न च चतुर्थी निर्दिष्टः प्रासनविधावस्ति। तस्मादप्राप्तो वनिष्ठुरग्नीधे वनिष्ठुमिति च चतुर्थ्याग्नीत्संप्रदाने हरणे विधीय
त इति प्राकृतस्येडाभक्षस्य विकारः। अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वं। मैत्रावरुणेनामात्ति पशावृत्विक्स किमिडां भक्षये
न्नेति संदेहे। नास्य प्रकृतितो भक्षः प्राप्तोऽस प्राकृतोऽप्यसौ। हौत्राध्वर्यवकारित्वात्कार्यतस्त्वस्ति भक्षणं। प्राकृता हि भक्षाः प्राकृत
कर्तृनियमांशे न कर्तृसंस्कारार्थाः। अपीष्टक्रमतोऽध्वर्युहोतृसंस्कारत्वादिडाभक्षस्य मैत्रावरुणे प्रेषकरणादध्वर्युकार्यमनुवचन
करणाच्च होतृकार्यं कुर्वाणोऽस्ति प्राप्तिः द्विभागः स्याद्द्विकर्मत्वात्। किमयं मैत्रावरुणो द्वौ भागौ भक्षयेत्उत नैकमिति। द्वयोः क
र्म कुर्वन्नुहौल मेनेति प्राप्ते ब्रूमः। अध्वर्योर्यावतीन्त त्विहोतुस्तस्ति श्चयावती। तंत्रेणैनावतीत्वस्ति भागेनैकेन लभ्यते। तस्मादे
कभागः स्यात्। प्रतिप्रस्थातुश्चवपाश्रपणात्। तत्रैव प्रतिप्रस्थातुरिडायामस्ति भक्षो नेति संशये। अध्वर्युकार्यं हविःश्रपण
मसौ च करोति वपाश्रपणं। तस्माद्भक्षयेत्॥ सत्यमसौ वपां श्रपयति। तस्यास्तु सर्वप्रदानत्वान्नास्ति शेषः प्रकृतौ च पशा पूर्व
स्यपः कर्त्तासत्तच्छेषस्य भक्षयिता। भिन्नं त्वांगापूर्वे प्योवपापूर्वमतस्तस्य कर्त्ता प्रतिप्रस्थाता तच्छेषमेव भक्षयितुमर्हति। सा च निः

शा॰ ९ शेषा। तस्मात्त्वास्य भक्षः। न चांगेभ्योपि द्रव्यादिभ्यो यमवदानं कुर्वन् भक्षं लभेत। दक्षिणतो निधाय प्रतिप्रस्थानावद्यतीति
पू॰ ९ वचनात् स्वयस्यांगत्वायामध्वर्योरेवावदानं न तद्विषयमिदमधिकरणं। प्रतिप्रस्थात्रवदानपक्षे तस्यैव भक्ष इदस्यमेवप
रमार्थपरिहारः। यत्त्वप्राकृतमिदमवदानमप्राकृतकार्यं च प्रदानान्तरभक्षाभावादित्युक्तं। तदयुक्तं यद्यपि हैव नान्यवदायनता
59 वत्तेव होतव्यं सौविष्टकृतान्यवद्यतीति मध्ये पदार्थान्तरविधानान्न्यायं प्रदानान्तरं भः तथापि प्रदानार्थमेवेदमवदानं नादृष्टार्थं न
याचावदानदर्शनाद् इडयादीनां हविष्टुस्सुक्तम् अदृष्टार्थेष्ववदाने हि न तेषां हविष्ट्वं सिद्ध्यति। तस्मादवद्यन्प्रतिप्रस्थानाल
भेतैव भक्षं। अध्वर्य्ववदानपक्षे तु नास्य भक्षो वपायानिःशेषत्वादिति सेनावानधिकरणार्थः विकृतौ प्राकृतस्य विधेर्ग्रहणा
स्तुनः श्रुतिरनर्थिकास्मात्। चातुर्मास्येषु साकमेधपर्वणि गृहमेधीयेष्टिः तत्र श्रूयते। आज्यभागौ यजति यत्त्रतायाद् इति
। तदिहाज्यभागश्रवणेष्टौ पक्षा विचार्यन्ते। किं चोदकप्राप्तानुवादमात्रं उत न द्वाभ्यां विधानं। अर्थवादार्थं वा। कर्म्मान्तरविधि राम॰
र्वा। परिसंख्या वा तद्वर्जानि देशो वा तयोर्वा तिदेशो वा। अपूर्वो वा गृहमेधीय इति। तत्र प्रकृतितः प्राप्ते श्वोरके नाज्यभाग पू॰ ९

योः गुणान्तरस्य चाभावादनुवादानुवादत्वमिष्यताम्॥ आनर्थक्यप्रसंगात्तु नचैतद्दृष्टं यंगमं। तस्मादुभाभ्यां विध्यन्तो दार्शिकोऽत्र
विधीयते॥ आज्यभागश्रवणं निर्वपणादिश्रवणवत्प्रकृतिसादृश्यमापादयच्चोदकस्य निमित्तं भवति। चोदकस्त्वैष्टिकं विध्य-
न्तं नियच्छतीत्येवमुभाभ्यामैष्टिकविध्यन्तविधिः। नेतरदपि युक्तं। औषधद्रव्यकत्वादेवैष्टिकातिदेशसिद्धेः। तस्माच्चोदक-
प्राप्तैष्टिकविध्यन्तप्रशंसार्थमिदं। एवमयं दर्शपूर्णमासविध्यन्तः प्रशस्तो यत्र त्वाज्यभागावपि स्तः। तौ च यज्ञतायाः इति। विधे-
कवाक्यत्वाभावादिदमप्यन्याय्यं तस्मात्कर्मान्तरविधिः। प्रसिद्धाज्यभागप्रत्यभिज्ञानात्तदपि न सारं तस्माच्चोदकेन सर्वेष्वंगेषु
प्राप्तेष्वाज्यभागयागपुनःश्रवणं समिदादियागानां परिसंख्यार्थं। आज्यभागावेव यजति न समिदादियागानिति। तदप्य-
नुपपन्नं। परिसंख्यायास्त्रिदोषत्वात्। तस्मात्प्रसक्तवचनसिद्धत्वादाज्यभागयोस्तद्वर्जमन्यान्यंगानि चोदकः प्रापयति। त-
द्यथवत्तु रस्तं नहि चोदकस्य प्रसंगव्यापारभेदोऽस्ति येनाज्यभागविषयेन व्याप्रियेत। एकेनैव व्यापारेणासौ सर्वाण्यंगानि
प्रापयति। नैवं चाज्यभागयोरपि प्राप्तत्वादनर्थकमेव पुनःश्रवणं स्यात्तस्माच्चोदकोपसंहारोऽयं प्रकृतिवत्कुर्यादिति। किं न स्याद्

श्रा॰ १० श्यमाज्यभागौ यजति। न ह्यप्यपेशलं। न हि प्रसक्तस्य शक्नोति देशः येनैव माश्रीयते कल्प्यो ह्यसौ न परिकल्पितेऽपि तस्मि
६० न्नाज्यभागावेवानुष्ठातव्यौ तयोः प्रसक्तेरेव वचनेन सिद्धेरनर्थकश्चोदकातिकारः। तस्मादपूर्वं नैव स्याद्गृहमेधीयकर्म
णः। प्राकृतांगनिराकांक्षं न तत्र चोदकमर्थयेत्। आज्यभागयोर्हि प्रकृतौ श्रुतयागरूपव्यतिरेकेण प्रकरणाम्नानकल्पितं स्वा
60 पूर्वद्वारेण यागगतव्यापाररूपमपरमस्ति। तद्रूपलक्षणार्थं चेदमाज्यभागश्रवणमन्यथानर्थकं स्यात्। अतश्च गृहमेधी
यप्रयोगवचनो यागगतं व्यापारमपेक्षमाणः प्रत्यक्षवचनविहिताज्यभागनिराकांक्षो न प्रकृतिमपेक्षते विकृत्यंतरे यानि
च प्राकृतान्यामनहोमादीन्यंगानि तेषां यागगतव्यापाररूपस्याकृतत्वात्तद्रूपापेक्षः प्रयोगवचनः सन्निहितान्यपि
तान्यतिक्रम्य प्राकृतानुक्तोपकाराणि गृहीत्वा पश्चात्समीपाम्नातानांगानर्थक्यपरिजिहीर्षया तान्यपि गृह्णातीति तत्रैव
श्चोदकलोपः। किंच। यदि गृहमेधीयः प्रकृतिपूर्वः स्यात् नाज्यभागमग्रहीत् क्रियेत तत्कृतं च तदनो वा गच्छामो नूनमत्र ना राम॰
स्ति चोदक इति। तस्माद्यत्र प्राकृतमंगनिर्गुणं श्रुतं तत्रापूर्वत्वं न तु पियावदुक्तं स्यात् गृहमेधीयवत् स्विष्टकृदिजादि ६०

कर्त्तव्यं नेति संशये। निराकांक्षत्वादाज्यभागाभ्यां गाम्न न कर्त्तव्यं। प्रयाजसंस्थत्वाविशेषात्तु कर्त्तव्यं। न च विकल्पः प्रकृताविव प्रक
रणे न सर्वेषां युगपद्ग्रहणान्न स्विष्टकृति प्रसक्तनिषेधः स्यात् तुल्यकारणत्वान्न। गृहमेधीय एव प्राकृतानां पुनः श्रवणं परिसं
ख्यार्थमिति कृत्वा विधीयते। नद्याहि समानजातीयमेव शेषोपस्थापनात् परिसंख्यायते। नान्यत्। तेनाज्यभागाभ्यां यागान्तरा
णि परिसंख्यायन्ते न शेषकार्याणि। स्विष्टकृत्तु किं प्राशित्रादीनां शेषकार्याणां परिसंख्यां करोति नेति चिन्तायामिडोपह्वान
दर्शनान्नेति प्राप्ते ब्रूमः। परिसंख्यैव प्राकृतः स्विष्टकृत्पुनः श्रूयमाणः शेषकार्यान्तराणि। इत्यादि दर्शनं तु वचनान्तरविहि
तत्वादुपपन्नं नान्यस्य शेषकार्यस्य निवृत्तिं सूचयति। शंयुपिंजान्ते च विकल्पः स्यात् सरेषु पत्न्यनूयाजप्रतिषेधाद्दनर्यको हि
स्यात्। ज्योतिष्टोमे श्रूयते।। शंयुपिंजान्ता प्रायणीया संतिष्ठते। न पत्नीः संयाजयंति। इडान्ताऽतिथ्या संतिष्ठते नानूयाजान्यजन्ती
ति। तत्र संशयः। किं प्रायणीयातिथ्ययोः शंयुपिंजान्ते वाक्यत्वं संस्थेवान्त शंयुपिंजान्ते एवेति। तत्र शंयुपिंजान्तवचनेन परेष्वङ्गेषु सर्वे
षु कर्त्तव्येषु पुनः पत्नीसंयाजानूयाजानामकर्त्तव्यत्ववचनं परिसंख्यारूपेणाङ्गान्तराणामकर्त्तव्यताप्रतिषेधेन कर्त्तव्यता।

शा॰ १॰ विधानार्थं पत्नीसंयाजानेव न कुर्याद् अन्यानि कुर्यादेवेति तेन पत्नीसंयाजप्रतिषेधेन कृत्स्नसंस्थाविधानात् शंयुविज्ञात्तवचनेन तत्सं
६१ स्थाविधानात् द्वयोः संस्थयोर्विकल्पः नैवं। वाक्यभेदो हि तथा स्याद् विकल्पश्चाष्टदोषभाक्। त्रिदोषा परिसंख्या च तस्मात्तुल्ये कृता
कृतार्थं शंयुविज्ञानं न विधेरेवायमर्थवादः। अर्थोऽनुवादः पत्नीसंयाजाद्यकरणाद् एवं भवतीति न विध्यन्तरं। तस्मान्नियमेन शंयुविज्ञा
6 नेन एव प्राप्ते यानि तेषां प्रतिषेधार्थं तत्राह वा द्वावन्तरस्य पुरस्तात् प्रतिषेधः स्यात्। शंयुविज्ञानयोरेव संदेहः। प्रकृतौ द्वौ एव पत्नी
संयाजानां पुरस्तादेकः पश्चादपरः। तयोरुभयविद्धि। अनुयाजानां पुरस्तादेकः पश्चादपरः। तत्र किं पूर्वाभ्यां शंयुविज्ञाभ्यां तदन्त
ता। उतोत्तराभ्यामिति। विशेषाभावाद् अनियमे प्राप्ते अभिधीयते। उत्तराभ्यामेव कुतः। इदं तावत् सर्वस्मिन् कृतो सर्गवचनवत् शंयुविज्ञा
न्नागरीति विधानमतो ये शंयोरिडायाश्च प्राग्भवः पदार्थाः ते कर्तव्याः। ये चोत्तराभ्यां शंयुविज्ञाभ्यां प्राक् च तेषामपि शंयुविज्ञाभ्यां पूर्वभा
वित्वमस्तीति कर्तव्यता गम्यते। तस्मादुत्तराभ्यामेव तदन्तता। तथा च पत्नीसंयाजान्तयाजप्रतिषेधो नैवार्थवान् भवति वाक्यमात्रं राम॰
त्वनर्थकं। स्यादेवं शंयुविज्ञानं न्नागरीति यद्विधीयते। प्रवृत्तयोः कृत्स्नसंस्थानं चोपनेषां शंयुविज्ञानयोः। संतिष्ठति न हि संख्यानमुपर ६१

मोविधीयतेनाज्ञु रीतिः। तेन प्रवृत्ते प्राप्णीयानिष्ठे शंय्विज्ञं तेन सत्स्यै संतिष्ठेते। तामवस्थां प्राप्य ततः परं न प्रवर्त्तितव्यमुपरं
नव्यं। तेन शंय्विजे चेत्स्मात्स्मानूह्ले न कर्त्तव्यमवस्थानमिति पूर्वयोः कृतयोः कर्त्तव्यं संस्थानमिति पूर्वाभ्यामेव नरंतना। प।
ल्पनुयाजमतिषेधस्त्वेकवाक्यत्वादर्थवादार्थेनुवादरूपत्वं। उपसत्सु यावदुक्तमकर्मस्थानं ज्योतिष्टोमे संस्कृपसदः पातेआग्नेइत्सो पसदाहृतयः
ताः प्रकृतस्य श्रूयते। अप्रयाजास्ता अननूयाजास्ताइति। तथाश्रुवेणाघारमाघारयतीति। तत्र संदेहः किं प्रतिषिद्ध प्र
याजादिवर्जमन्यत्सर्वं प्राकृतं कर्त्तव्यमुत प्रत्यक्ष वचनविहितानाघारादिना परिसंख्यानादपूर्वं नापरत्वाद्वासर्वम
कृतमकर्त्तव्यमिति। परिसंख्यापक्षस्तु गृहमेधीयवन्निरस्तोपिसंभवमात्रेणोपन्यस्तइतिहावेदयत्सो। तत्र के
नापिकारणेनाघारादीनामभावमाशंक्य प्रतिप्रसवं कुर्वदिदं वचनमिदं प्रतिभाति। नाघारादिभ्यो न्यामाहुतिमोपसदीं
आ२ पुरस्ताज्जुहुयाघरम्याज्जुहुयादन्यत्तत्सुरवंकुर्यात्। आघारयोहि सर्वेष्टीनां मुखं। अतः स्रुवेणाघारमाघारयतीति। तेनप्रति
षिद्धप्रतिप्रसवार्थमिदं न परिसंख्यामपूर्वतां वाशक्नोतिकर्तुं। अथवा चोदकप्राप्तानुवादमात्रमिदमस्तु। नन्वानर्थसंस्था
तु। अपूर्वता पक्षे प्रयाजास्ताअननूयाजास्ता इति वचनद्वयंनर्थकमेवस्यात्। तदुरमेकस्यैवानर्थक्यं। तस्मात्प्रति

शा. १. षिद्वर्जमन्यत्सर्वं कर्त्तव्यं। उच्यते। न तावद्भावाशंकाघारादीनामस्तिये न प्रतिप्रसवः क्रियेत। तस्माद्दपूर्वं नापरमे
६२ वैतत्। अप्रयाजानन्यूयाजवचनं त्वनुवादमात्रम्। आख्याताभावात्। स्कन्वाघारवचनं त्वाख्यातसद्भावाद्यत्स्प्रज्ञासा पत्नीयमि सदगमायेति
दृतिवत्स्कन्निंसर्वंधाद्विधायसरदृर्वतां गमयतीति विशेषः। अवभृथे बर्हिःप्रतिषेधाच्छेषकर्मस्थाने अवभृथेप्सुध
अप्सुधाद्युक्त मन्त्रकार्यावसथः ते। अप्सु मंनावाज्यभागौ यजतीति। तथा अपबर्हिषः प्रयाजान्यजति। अपबर्हिषावनूयाजौ यजतीति। तत्र किमवभृथे
बर्हिःसंज्ञं चतुर्थं प्रयाजे बर्हिःसंज्ञं प्रथममनूयाजं वर्जयित्वान्यत्सर्वं कर्त्तव्यं। उत प्रत्यक्षश्रुतव्यतिरिक्तमन्यत्सर्वं परिसं
६२ ख्यानाद्दपूर्वं वाह्वानं कर्त्तव्यमिति संशयः। तत्राज्यभागवचनमप्सु मंत्रागुणविधानार्थं तापूर्वतां गमयति। तस्माद्ब
र्हिर्वर्जमन्यत्सर्वं कर्त्तव्यं। मैवं। लिंगक्रमाभ्यामेवाप्स्वग्नेस्सधिष्ठवाप्सु मेसो मोऽप्रन्नवीदिति मंत्रप्राप्तेः प्राप्तेवाज्यभा
गयोरप्सु मन्त्रासान विधानव्या। तेनाज्यभागविध्यर्थमेव वचनमित्य पूर्वोवभृथः। अपबर्हिषः प्रयाजान्यजतीत्यादिवचनं
बर्हिर्व्यतिरिक्तप्रयाजविधानार्थं न बर्हिःप्रतिषेधार्थं विरोधिनामेकश्रुतौ नियमः स्यादूहलगस्यार्थवत्त्वाच्छ्वरन्न क्रेतितो राम.
विशिष्टत्वात्। यत्र चोदकेनानेकेषां प्राप्तानामेकं प्रत्यक्षं श्रूयते यथा खादिरो यूपो बृहत्पृष्ठं यवमयः पुरोडाश इत्यादि ६२

पुनरत्र किं श्रुतस्य खदिरादेरनिर्दिष्टस्य पलाशादेः प्रकृतिवद्विकल्पः अथवा श्रुतस्यैव नियम इति संशये। विकल्पः प्रकृ
तिवत्। प्रत्यक्षवचनं तु न खदिरादेर्विधायकं। प्राप्तत्वात्॥ पलाशादिनिवृत्त्यर्थत्वे त्रिदोषा परिसंख्या स्यात्। तस्मादनुवा
दमात्रमिति यथा चोदकं विकल्पः। नैवं। यथैव प्रकृतावर्थादनियतानेकद्रव्यकत्वे प्राप्ते व्रीहिखदिरादिश्रवणं निय
मार्थं एवं चोदकेनापि अनियमेन खदिरादिप्राप्यमाणं प्रत्यक्षवचनेन नियम्यते। तन्नियमाच्चार्थाभावात्पलाशा
देर्निवृत्तिः सर्वासां च गुणानामर्थवाद्ग्रहणमप्रकृते स्यात् अध्ययादावर्थलोपाद्बाधो वर्णितः। प्रत्याम्नानस्य तु बा
धकत्वं सिद्धवत्सर्वत्र व्यवहृतमिदानीं तु तदेव चिन्त्यते। किं प्रत्यक्षश्रुतेन श्यामाकादिना प्रत्याम्नानाच्चोदकप्राप्तं व्री
ह्यादि बाधितुं शक्यं। उतोभयं तुल्यबलमिति विकल्पः समुच्चयो वा। तत्र नद्र्ज प्राप्तिनिराकरणाच्चोदकेन तावद्व्रीह्या
द्यपि प्राप्यते। न च प्राप्तं शक्यं केनचिद्बाधितुं। शास्त्रप्रामाण्याविशेषात्। तथा च नार्षेयं वृणीत इति प्रत्यक्षोऽपि प्रतिषे
धः पक्षे चोदकप्राप्तेन वरणेन विकल्प्यत इति वक्ष्यते। ननु तुल्यतादुभयं श्रुतलक्षणमिति। न च सत्यपि चोदकप्राप्तस्याङ्गत्वे व्रीह्या

शा॰ १॰ हेरननुष्ठानं। कार्यनिमित्तं त्वनुष्ठानं तत्साधनत्वे सति व्रीहीणां को नाम निराकुर्यात्तस्माद्विकल्पः समुच्चयो वा। तत्संघ
द्विपारमार्थिकी चोदकप्राप्तिः स्यान्न त्वेवं। चोदको हि यद्यपि सर्वपदार्थानुरक्तं यागगतं व्यापारं प्रापयन्नेकेनैव व्यापारे
६३ ण सर्वाण्यंगानि प्रापयति न प्रत्येकं तथापि व्रीह्यादिविशेषप्रत्यक्षवचनविरोधमालोच्य तद्द्वारिनिक्तांगपरत्वेन व्यवस्था
रामद्रुह प्यते। तदिदमुक्तं भाष्यकारेण। यदुक्तमग्रहणमिति तदिहास्तिद्वमिति सिद्धान्तत्वेन स्थापितमित्यर्थः। समुच्चयस्यानन्तरं प्राप्त
63 मपि प्रयोजनाभावान्नानुष्ठीयत इति। नत्वनिदिष्टमपि व्रीह्यादिपदैः सिद्धे यागेनुष्ठानमयमभिप्रायः। तस्मात्तत्सस्वरूपं द्रव्यस्येव साभ
त्वं चोदकप्राप्तं बाधते न चैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् क्वचिद् दृश्यते औदुंबरो यूपो भवतीति। तत्र
किं प्राकृतं खादिरं यूपद्रव्यं प्रवर्त्तते नेति संशये। द्वयोरपि सहनियोजनसंभवात् सति विरोधे न युक्तो बाधः। तस्माद् द्वयो
रपि यूपयोः समुच्चयः। नैवं निरपेक्षो हि खादिरश्चोदकेन प्राप्यते निरपेक्षश्चौदुंबर उपदेशेन। समुच्चये द्वयोरपि बाधः। किं राम॰
त्वौदुंबरवचनेन न यूपान्तरं विधीयते किं तर्हि प्राकृतस्यैव यूपस्य खादिरतापकर्षस्यौदुंबरता विधीयत इति स्पष्टो बाधः ६३

विकृतौ त्वनियमः स्यान्न्यवदाज्यवदवहणस्य गुणार्थत्वादुभयोश्च प्रतिषिद्धत्वाद्गुणशास्त्रं यथेति स्यात् ७ यत्र प्राकृतानां वैक
ल्पिकानामन्यतमद्वैकल्पिकं गुणांतरसहितं कर्म्मोत्पत्तिवाक्ये श्रूयते। यथा सौमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणां नैर्ऋतं
चरुं निर्वपेत्कृष्णानां व्रीहीणामिति। तत्र संशयः किं व्रीहियवयोर्विकल्पः व्रीहिपक्षे च शुक्लरूपविधिरुत सर्वदा व्रीहय एवेति।
तत्र व्रीहिग्रहणस्य शुक्लादिगुणसंबंधार्थत्वेनाविधायकत्वान्न यवानां बाधः। तस्माद्विकल्पः नैवं न ह्येकेन वाक्येन यागस्यो
दृक्प्राप्तव्रीह्युद्देशेन गुणस्य च विधानं संभवति। तस्मात् द्रव्यगुणविशिष्टकर्मविधानादुपदिष्टा व्रीहयो यवान्बाधेरन्॥
पयाश्रुतीति चेत् अग्नीषोमीये पशौ श्रूयते यद्यपि चतुरवत्ती यजमानः पंचावत्तैव वपा कार्येति। तत्र किं पंचावदानं वपाया
मेवोत हृदयादिष्वंगेषु संकीर्यत इति संशये। वपोद्देशेन विधानाद्वपापूर्वस्य चांगापूर्वेभ्यो भिन्नत्वाच्च समसाधिकरणन्यायेना
संकरेणाप्राप्ते विधीयते। वपामुद्दिश्य चोद्यते न यदि पंचावदानता। स्यादेवमवदानेषु पंचसंख्यात्र चोद्यते। न हि वपामुद्दिश्य
पंचत्वविशिष्टमवदानं विधीयते॥ अवदानस्याप्राप्तत्वात्॥ अतोऽवदानोद्देशेन पंचसंख्याविधानादुद्दिश्यमानस्य च वपयावि

शा.१. शेषणासंभवाच्चाकृतावदानमुद्दिश्य पंचत्वं विधीयते। वपाग्रहणं तु प्रदर्शनार्थमिति सर्वेषां पंचावदानं। ननु समासैकदे
६४ शमवदानमुद्दिश्यैकदेशान्तरं पंचत्वं अंगवन्न शक्यं विधातुं।। अतो वपामेवोद्दिश्य पंचसंख्याविशिष्टमवदानान्तरं प्राकृता
वदानकार्यमध्वर्युप्राकाशदानवद्विधीयते। वपाग्रहणं वैवमर्थवद्भविष्यति। ऊनरथाऽवयुसानुवाहोलक्षणावास्यात्तास
त्वपियस्तु यागतद्पूर्वयोरेकत्वे प्यासा पूर्वभेदान्मैत्रावरुणादिश्रयणवद्धा पूर्वप्रयुक्तत्वासंवावदानस्यतानेऽ.षु
संकरो भवति। उच्यते एकादेशैव पशोरवदानानि तानि तानि निर्दिश्य वघनीतियदेन तद्ध्यवदानवचनमिदमत्र सिद्धं
तस्य मूलयुक्तिः। वपामात्रविषये हि पंचावदाने प्रकृतितएव द्विर्हविषोवघनीति प्राप्तत्वात्तद्ध्यवदानवचनमनर्थ
कं स्यात्। सर्वविषये तु पंचावदाने संख्यासंयत्तयेह विषः स्यवदाने प्राप्ते ध्यवदानविधानमर्थवद्भवति। सकलवचनान
र्थकाद्दरमेकस्य वपाग्रहणस्योपलक्षणार्थत्वमंगीकृतं। तस्मात्सर्वविषयं पंचत्वं न चांगेषु ध्यवचनाद्उपस्तरणाविष्टध्या राम.
अभिघारणविहद्ध्यावासंपद्यते। तस्माद्दंगेषपि पंचावदानं इति पार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां दश ६४

मंस्यसप्तमः पादः प्रतिषेधः प्रदेशेनारभ्य विधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् महापितृयज्ञे दार्शपौर्णमासिके
विध्यन्ते प्रदिष्टे श्रूयते। नार्षेयं वृणीते न होतारमिति। तथाऽनारभ्य श्रूयते यजतिषु येयजामहं करोति नानूयाजेषु ये
यजामहं करोतीति। तत्र विचार्यते। किं महापितृयज्ञे वरणस्य प्रदिष्टस्य तत्प्रतिषेधस्य च विकल्पः। तथानूयाजेषु येयजाम
हत्वप्रतिषेधयोः उत नियोगतो वर्जनमेवेति। तदर्थमिदं चिन्त्यते। नार्षेयं नानूयाजेष्विति किमयं प्रतिषेधः उत पर्युदास
इति। तत्र शब्दसामर्थ्यलाभाय प्रतिषेधो न्यथा पुनः। यदि ह्ययमपि स्यान्नपरत्वाल्लक्षणा भवेत्। प्रतिषेधपक्षे हि वारकप्राप्तमार्षेयव
रणं श्रुत्यैवान्यपरेण श्रुत्यैव प्रतिषिध्यते। अनारभ्यवादप्राप्तश्च येयजामहः। पर्युदासपक्षे पुनर्नानूयाजशब्दाभ्यां यागा
न्तराणि नञ्वृणीतिभ्यां च वरणस्य निमित्तचोदकप्राप्तांगान्तराणि लक्षणया प्रतिपाद्येरन्। न च श्रुतिसंभवे लक्षणा युक्ता
। किंचानूयाजप्रभृतिसंबंधेन नञ्समासप्रसंगः। गिसोत्यस्य सुबंतसंबंधे समास इति श्रुवन्वार्त्तिककारो वाचन्नानर्थक्यं मन्य
ते। एवं हि वदन्वाक्यसमासयोर्भिन्नार्थतामप्येनेसनिस्यैकार्थ्ये सति नियमाद्वाक्यं निवर्त्तेत। तन्मा निवर्त्तिष्टेति कर्तव्यं वाचेवेनेमि

शा. १ तिनञानर्थक्यंनञ्याज्॥ आनर्थक्यवचनात्तुनास्यैकार्थ्यमितिगम्यते। ननोऽनूयाजेष्वितिसमासगम्यः पर्युदासस्तदै
६५ वलभ्यतइतिनद्विवक्षायांनिसःसमासःस्यात्तस्मात्।तिसमासेनानूयाजेष्वितिव्याख्यानसंबंधीसन्नञ्प्रतिषेधार्थत्वज्ञा
यते। अतश्चप्रदेशानारभ्यवादाभ्यांविहितत्वाद्दाभ्यावचनाभ्यांचप्रतिषिद्धत्वाद्वरणाये यजामहयोर्विकल्पः। ननुसामा
65 न्यविषयस्यविधेर्विशेषविषयस्यैवप्रतिषेधस्यातुल्यबलत्वाद्युक्तोबाधोनविकल्पः। तथानुमानिकस्यचोदकस्यप्र
त्यक्षस्यचसुतरामयुक्तइतिचेदानैवं। तन्नामप्रसक्तविशेषशास्त्रंसामान्यस्यानुमानिकस्यचबाधनेक्षमंयत्त्विरपेक्ष
मात्मानंलभतेयथाशरमयंशास्त्रेकुशाहवनीययोर्नहिशरविधिः कुशप्राप्तिमपेक्षतेनेतत्कार्यमात्रापेक्षत्वान्पदहवि राम.
धिरपिहोममात्रापेक्षोनाहवनीयप्राप्तिमपेक्षते॥ ननप्राग्वैकुशाहवनीयप्राप्तेःप्रत्यक्षेणविशेषशास्त्रेणशरप्रवि
विहितेशरपदेपश्चात्सामान्यद्वारालक्षणयाप्राप्यमाणयोःप्राप्तिंनिवारयन्नितियुक्तोबाधः। अत्रतुप्रतिषेधस्यप्राप्य ६५
पेक्षत्वादृच्छ्यंप्रतिषेधात्नाशास्त्रेणैवप्रतिषिध्यमानयोर्वरणायेयजामहयोर्महापितृयज्ञेऽनूयाजेषुचप्राप्तिःप्रतीक्षितन

ष्याप्राप्तिश्च निर्दोषत्वात्सकारिनिवारणार्थमा मिथ्याकर्त्तुं। तस्मादिह विकल्प इति प्राप्ते ब्रूमः। यत एव विकल्पोयं प्रतिषेधे प्रस
ज्यते अतस्तत्परिहाराय पर्युदासाश्रयो वरं। नित्यवद्भ्रूनयोर्विधिप्रतिषेधयोः पक्षेप्यसंनाविद्यमानमिथ्याविकल्पनाद
त्वं नायुक्तो विकल्प इति निवर्त्तनं सूत्रेणयापि पर्युदासाश्रयणं। न चानूयाजयोरिव संबंधेन त्र्यसमासाप्तिः विभाषाध्याय
नासाणिनेः कासायनीयं तु वाचेवैनानर्थकं न्यायाद्याविरोधादिनारब्धं तं। अस्ति हि वृत्तिवाक्ययोरैकार्थ्यं यत एव हि राजपुरुष
इति वृत्तेरर्थो राजविशिष्टः पुरुषः स एव राज्ञः पुरुष इति वाक्यस्यापि। विशेषस्तु तावानेव तावभिधानद्वयमप्यनन्याप्तिप्रसक्ता
र्थं सहैकं विशिष्टं प्रतिपादयति। वाक्ये त्वर्थान राजस्तेयं सहते। यथा ऋद्धस्य राज्ञः पुरुष इति राजपदस्य द्धा सेधमनुभवत्पुरुषं
विशिनष्टि। नचैतावतार्थभेदः। प्रतिपाद्याभेदात्। यदि वैतावता भेदेन समासो वाक्यस्यानिवर्तकः संगीतिर्येन न नो विभाषावच
नान्प्राग्विहितेनोपकुंभादिसमासेनापि माकं न निवर्नैत न थोपयरस्समासे न कुंभका राज्यभागौ स्तः दीक्षणीयादिद्वा)
(रेण त्वाज्यभागाभ्यां सोमस्यास्तिसंबंधः स प्रतिषिध्यते॥ तदनेन प्रकारेण सोमांगेषु दीक्षणीयादिषु आज्यभागप्रतिषेधः)

मा·१· पर्युदासो विनिमासे क्रमः। यद्यपदेशेनातिदेशेनातिदेशेन वज्य भागौ सोमे प्राप्स्यातां ततः। निषेधः स्यात्। यदि वसोमसाधा
६६ रणमाज्यभागविधानमभविष्यत्ततो ऽसोम इति पर्युदासो वा दिना न चैवमिष्टं तस्मादवश्यादेयं विभाषावचनमित्यन्याय्यं न
66 दानर्थकं तस्मादस्मिन्मासेपि विकल्पमपरिजिहीर्षया युक्तं पर्युदासाश्रयणं॥ एवं च प्रदेशानारभ्यवाद्ययोरेवायं वाक्यशेषः प्रकृ
तिवत्कुर्यादार्षेयवरणव्यतिरिक्तं पित्र्ययज्ञे अन्यप्रयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं कुर्यादिति। ततश्च विधेरंगांतरयज्ञांत
रविषयत्वादविहितमेवावरणमन्याजेषु च येयजामहः। तस्मान्न विकल्पो ऽनुष्ठानमेवासो यं प्रतिषेधनिबंधनः
प्राकृतांगबाधः। शरैः कुशानां प्रत्याम्नानात्। स्वयंदिनाद्रिषु लवनादीनामर्थलोपादिति त्रेधा बाधो वेदितव्यः। अपूर्वे चार्थ
वादः स्यात्। दर्शपूर्णमासयोराज्यभागावग्नीषोमाभ्यां यजतीत्येवं विधावश्रूयते। तौ न पशौ करोति न सोमे इति। किमयं
प्रतिषेधः पर्युदासो वा अर्थवादो वेति संशये तत्रास्मत्स्वात्प्रतिषेधः। विकल्पभयाद्वा पूर्ववत्पर्युदासः। ननु सोमस्योप राम·
देशातिदेशाभ्यामाज्यभागप्राप्त्यभावादुभयमप्ययुक्तं। सत्यं सा प्राप्ता सोमेनाज्यभागौ स्वतः दीक्षणीयादिद्वारेण वा आज्यभाग। ६६

ष्यां सोमस्याज्यस्तिसंबंधः स प्रतिषिध्यते॥ तदनेन प्रकारेण सोमांगेषु दीक्षणीयादिष्वाज्यभागप्रतिषेधः पर्युदासो वेति
प्राप्ते ब्रूमः। यद्यप्युपदेशेनातिदेशेनातिदेशेन वाज्यभागौ सोमे प्राप्नुयातां ततः। निषेधः स्यात्। यदि च सोमस्य सोमसाधारणमा
ज्यभागविधानमभविष्यत्ततोऽसोम इति पर्युदासो वा कल्प्यं स्यात् न त्वेवमस्ति न च दीक्षणीयादिषु प्रतिषेधः। तथा सति न सो
म इत्यस्यानेनैवाग्नीषोमीयेऽपि पशौ प्रतिषेधसिद्धेस्तन्त्रेण तद्विकारेष्वनिरूढादिपशुष्वपि प्राप्त्यभावात् पशाविति प्रति
षेधोनर्थकः स्यात्। सोम इत्यस्य चैवं लक्षणा स्यात्। न च वाजपेयस्येव यूपे नाङ्गद्वारकः सोमाज्यभागसंबंधो निर्दिश्यते।
षष्ठी हि संबंधमात्रमभिधत्ते सप्तमी त्वाधाराधेयभावमेवातश्चांगांगत्वेनाधाराधेयभावः संभवति। तस्मादंगाद्धि भाव नि
र्देश्योयं सन्नाप्राप्तमिति तत्प्रतिषेधपर्युदासावयुक्तौ। तस्मान्न पशाविति सप्तम्यर्थवादोयं यथा सोमस्य नाज्यभागौ एवं पशा
वपीति॥ अथ न पशाविति किमयं प्रतिषेधः पर्युदासो वा विकल्पपरिहाराय पर्युदास इति केचित्॥ तदयुक्तं॥ अनेन तत्रत्य सा
ज्यभागांगविधेः केवलदर्शपूर्णमासविषयत्वेन पशुसाधारण्याभावात् न च पाशुकस्य प्रकृतिवद्भावस्यायं ताप्यशेषः त

शा॰१॰ स्यस्य सन्निधानात्तद्वेषवेचनसोमइत्यर्थवादेनावकल्प्यते। नत्वेवं संभवति यथा सोमस्याज्यभागव्यतिरिक्तमग्नेः मेष्टिकं कर्त्त
६० व्यं तथा पशौ रपीति। सोमस्यापूर्वत्वादैष्टिकांगाभावात्। संभवति त्वेवं। यथा सोमस्याज्यभागो न कर्त्तव्यो तथा पशौ रपीति। त
67 स्मात्प्रतिषेधः। ननु च पंशावाज्यभागयोर्विकल्पः शिष्टत्वात्तु प्रतिषेधः स्यात्। सामान्यविषये विधौ विशेषयो नञ् पर्युदासरू
पेण विधेरेव वाक्यशेष इत्युक्तं न प्राप्तविषयस्तु नञ् अर्थवाद इति। अथ यद्वायं प्रतिषेधो भवतीति। ननु उच्यते। यत्रैक
मर्थं शिष्टा न हि षयए व नकारः श्रूयते यथा तिरात्रे षोडशिनं गृह्णाति नातिरात्र इति। तत्र प्रतिषेधः पर्युदासार्थवादा
संभवाद् ग्रहणाग्रहणयोर्विकल्पः। प्रतिषेधार्थत्वाद्वाक्यकरणेऽपि क्रतुसिद्धिरस्तीति कल्प्यते। विध्यर्थत्वापत्ता चानुष्ठा
ने फलभूयस्त्वमिष्टभयोरुपपत्तिः। न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्च॥ ॥ अस्येदानी
मपवादः क्रियते शिष्टापि श्रूयमाणो नञ् क्वचिद्विधिनिषेधार्थमपहायार्थवादार्थो भवति यत्र विध्यंतरेणैकवाक्यत्वम्। तथा राम
ह्यग्निहोत्रे जर्त्तिलयवाग्वा वा जुहुयात् इति गवेधुकयवाग्वा वेत्युक्त्वा अनाहुतिर्वै जर्त्तिलाश्च गवेधुकाश्चेत्युक्तं न नः पुनः पयसा ६०

ग्निहोत्रं जुहुयादिति श्रुतं। तत्र संशयः। किं जर्त्तिलगवेधुकानामनाहुतिवादः प्रतिषेधः उत पयसो होमस्यार्थवाद इति। तत्र पूर्वेण
न्यायेन प्रतिषेधार्थता। जर्त्तिलगवेधुकास्तावद्धिंस्यप्टेन लिङ्प्रत्ययेन विहितास्तेषामयमनाहुतिवादः प्रतिषेधः। पयोविधि
श्च वाक्यान्तरमिति धात्वेनाभिधीयते। यद्यपि जर्त्तिलगवेधुका विहिताः स्फुटस्तथाप्यनाहुतिवादेनैव प्रतिषेधो नर्थकत्वात्। विकल्पार्थेन
हि प्रतिषेधः सवेह विकल्पः पयोविधिनैव जर्त्तिलगवेधुकानां सिद्ध इति व्यर्थः प्रतिषेधः। परेणा च विधिनास्य समस्तस्यैकार्थ
त्वमर्थवादतया संभवतीति न युक्तो वाक्यभेदः। तस्मादनाहुतिवादस्तावज्जर्त्तिलादिनिन्दाद्वारेण पयसः स्तुत्यर्थः। यद्वैवं
नद्या जर्त्तिलादिविधिरपि नन्निन्दाद्वारेण पयसः प्रशस्ततरत्वं ज्ञापयन्नर्थवाद एवाद एवानविधिः। एकवाक्यत्वसंभवे त्वने
कादृष्टानुबन्धिवाक्यभेदकल्पनमन्याय्यं। तस्मात्पयोमात्रं विधीयते अन्यत्सर्वोर्थवादः पूर्वैश्च तुल्यकालत्वात्। आधाने श्रू
यते। होतव्यमग्निहोत्रं न होतव्यमिति मीमांसन्ते ब्रह्मवादिनः यष जुषा जुहुयादयथापूर्वमाहुती जुहुयात् यन्न जुहुयादग्नि। परा
भवेत्तूष्णीमेव होतव्यमिति। तथा चातुर्मास्येषु संवकानधिसास्य श्रूयते॥ अभिघार्या अनभिघार्या इति मीमांसन्ते द्येभिघारये

शा॰१॰ दुद्रायास्येपश्यन्नभिद्ध्यादघृताभिधारयेन्नरुद्रायास्येपश्यन्नभिद्ध्यादित्योरवल्वाहुरभिधार्यएवेति। तत्रसंशयः किंहोमाभिधार-
६८ णयोर्विकल्पः उतानुष्ठानमेवेति। तत्रहोमाभिधारणयोर्विधेयत्वमविवादमतोहोतव्यमभिधार्यादितिचविध्यर्थमेव। नजर्त्ति
लश्रवणएवदृत्यार्थे। एवंचनहोतव्यंनाभिधार्यादितिवप्रतिषेधार्थमेवभवति। नमीमांसाविशेषणं। नह्येकपदार्थवलं विनीमी
68 मांसासंभवतीतिनस्माद्धोतव्यमितिविधेर्नहोतव्यमितिचनिषेधाद्विकल्पः। सतिचविकल्पेऽन्यतरपरिग्रहायप्रयोगदृशा
यांमीमांसाभवतीतिनदृतिप्रामाण्येणानुवादोमीमांसाशब्दः। अंनेतूष्णीहोतव्यमितितूष्णींभावगुणविधानार्थंवचनं। अपि
चरुद्रायास्येपश्यन्नभिदध्यादित्यभिघारयतिनिंदाकथंनहिधेःशेषोभवेत्। तस्मान्निषेधशेषएवायमंनेत्वभिधार्यादितिवचन
मनुवाददितिप्राप्तेब्रूमः। सत्संहोमाभिधारणविधेयोनथाप्यपक्रमेश्रवणंनविध्यर्थमुभयोरपिहोमाहोमयोर्मीमांसासंभ
धावगमादंतेवनन्यपरंश्रवणंविध्यर्थं। नदर्थवाराधं। निंदापिचप्रशस्ततरवस्थापनार्थैव। एवमिमिदमभिधारणंप्रशस्तंयस्ते राम॰
नमविशेषमनादृत्यकर्तव्यमिति। तस्मान्नविकल्पोनियतएवहोमाभिधारणे ॥ उपचारश्चनद्दन्न अग्न्याधेयेवारवंसादि ६८

सामगानं विधाय श्रूयते। नब्रह्मा सामानि गायेदिति। तत्र संशयः। किमयं प्रतिषेधोऽनुवादो नित्यं सामगानमुत प्रतिषेधार्थमेवेदं
विकल्पः सामगानस्येति तत्र ब्रह्मणो गानप्राप्त्यभावादनुवादोऽयं निषेधस्तेन नित्यं गानं नैवं। अनुवादमात्रस्यानर्थकत्वात्। त
स्माद्गाननिषेधोऽयं। ब्रह्मशब्दस्तु ब्राह्मणपरोऽनुवादः दीक्षितस्य दानहोमपाकप्रतिषेधो विशेषात्सर्वदानहोमपाकप्रतिषेधः
स्यात् ज्योतिष्टोमे श्रूयते। दीक्षितो न ददाति न जुहोति न पचतीति। तत्र विचारः। किमयं सर्वेषामेव पुरुषार्थानां क्रत्वर्थानां चो
पदिष्टानामतिदिष्टानां च प्रतिषेधः उतातिदिष्टानां पुरुषार्थानां च। अथवा पुरुषार्थानामेवाग्निहोत्रादीनामिति। तत्राविशेषा
त्सर्वेषां। आहस्य विहितानां तु गृहे जुहोतीत्यादीनां बलवत्त्वात्तदर्जमातिदेशिकानां चतुरवत्तहोमादीनामग्निहोत्रादीनां च बाध
इति प्राप्ते ब्रूमः। विकल्पप्रसंगात् क्रत्वर्थप्रतिषेधः। तस्मात्पुरुषार्थानामेव। तत्रापि प्रतिषेधपक्षे विकल्पदोषः स्यादेव। तस्मात्प
र्युदासोऽग्निहोत्रादिविधेः शेषोऽयमदीक्षितोऽग्निहोत्रादिकुर्यादिति। न त्वेतत् पक्षमसन्निहितत्वादग्निहोत्रादिविधेः। तस्मात्प्रतिषेध
एवायं न च विकल्पप्रसक्तिरैकार्थ्याभावात्। यद्यभावपि विधिप्रतिषेधौ पुरुषार्थौ क्रत्वर्थौ वा भविष्ययातां ततो विकल्पिष्ययातां।

शा॰ १ पुरुषार्थतया तु विहितानामग्निहोत्रादीनां क्रतुमध्येपि प्राप्तानां प्रतिषेधः क्रत्वर्थतया क्रियमाणस्यानुपगमादि प्रतिषेधवचनतः क्रतु
६९ मनुतिष्ठताऽवश्यं वर्जनीयान्यग्निहोत्रादीनि भवंति नास्ति विकल्पप्रसंगः। यदा च प्रतिषेधपक्षेपि विकल्पस्तदा क्रत्वर्थलि
प्सया प्रकरणानुज्ञिस्त्वपास्या च प्रतिषेधत्वमेव न्याय्यं। पर्युदासपक्षे हि नशब्दवृत्तिदीक्षित नशब्दवृत्तावुभावपि दीक्षितव्यतिरिक्तपुरुष
69 लक्षणार्थौ स्यातां। तस्मात्प्रतिषेधः। तथापि विकल्पाभावात्फलतः पर्युदासत्वं भवतीति मत्वा सूत्रभाष्यकाराभ्यां पर्युदास
त्वमुक्तं। यदि च पर्युदासः स्यात्तदा वरं क्रत्वर्थानामेव होमादीनां पर्युदासः। यद्यपि प्रसक्तेर्विशेषरूपेण चोपदिष्टत्वान्नाग्निहोत्रं जु
होतीत्येवं यो जुहोतीत्येवमादीनामशक्यः पर्युदासः। तथापि सामान्यतोतिदेशेन प्राप्यमाणानां चतुरवत्तहोमनारिष्टहोमा
नामार्षेयवरणस्य पर्युदासः स्यात्। ननु नेदीक्षितस्येव विधीयं नइ निकषं नेषुदीक्षितस्य पर्युदासो विधीयते नैवं। नदीक्षित न
शब्देन सह नञः पर्युदासत्वमदीक्षित नइति कथं नहि ददात्यादिशब्दैः दीक्षितो दानहोमपाकप्रतिकानि शाब्दनान्यमानिकु राम॰
र्यादिति एवमतिदेशपर्युदासेन प्रकरणगतानामेव वा प्रायणीयादिविधीनां दीक्षोत्तरकालभाविनां शेषोभवन्नयं पर्युदासो ६९

नासन्निहिताग्निहोत्रादिशेषतामवलंबते। तस्माल्लुप्तप्राणापरिहारायपर्युदासस्य संपरिग्रहस्तत्रक्रत्वर्थत्वस्याप्रतिषेध

त्वमेवांगीकृतस्यक्रत्वर्थप्रतिषेधविकल्पप्रसंगासुरूपायोनामेवप्रतिषेधः क्रत्वंगतयाविधीयतइत्येतदेवसमंजसं अविशेषे

णायच्छास्त्रमन्याय्यत्वाद्विकल्पस्यनत्वं दिग्धमारा द्विशेषशिष्टंस्यात् नत्वप्रसंगं समाप्याधुनापवादप्रसंगात्सामान्यविशेषबा

धं चिंतयति। यदाहवनीये जुहोतीति सामान्यविहितस्याहवनीयस्य पदेजुहोति वर्त्मनि जुहोतीत्यार्हपत्ये पत्नीसंयाजान् जुहोतीति

विशेषविशेषविहितैः पदादिभिः किं विकल्पोऽथवा बाध इति संदेहः। यदि सामान्यविशेषयोस्तुल्यबलत्वं ततो विकल्पः। विशेषबलीयस्त्वे

तु बाधः। तत्र सामान्यस्यापि लब्धात्मत्वं विशेषवत्। नास्ति लिंगादिवद्बाधो नापि बाधो निर्देशवत्। लिंगादिकल्प्यं हि शास्त्र

स्पर्शी स्वशास्त्रेण कल्पनानिरोधाद्युक्तो बाधः। तथातिदेशस्यानुमानिकत्वात्स्वसंशयाश्रयादिशास्त्रेण विरोधे सति तद्विषयेऽप

रित्यस्य विषयान्तरपरिकल्पना युक्ता। कुशानां बाधः। सामान्यशास्त्रं तु लब्धसंप्रत्ययस्वरूपं न च विशेषशास्त्रवदिति तुल्यबलत्वाद्विक

ल्प एव युक्त इति प्राप्ते ब्रूमः। प्राप्तिः सामान्यशिष्टस्य विशेषलक्षणावशात्। अस्त्वाविशेषशिष्टस्य तस्माद्बलवत्त्वं पत्नीसंयाजा

शा.१ दिषुहोमविशेषेषुहोमसामान्येकृतस्याहवनीयस्यलक्षणयाप्राप्तिःगार्हपत्यादिषुकृतेष्वेवहोमविशेषेविधीयते।तेनास्मिन्विशेषे
७० कृतसाशीघ्रप्राप्तंगार्हपत्यादिकंलक्षणयामंथरप्राप्तमाहवनीयंनिरुणद्धीतिबाधः।अप्रकरणेनुयच्छास्त्रंविशेषेश्रूयमाण
मविकृतमाज्यभागवत्प्राकृतमप्रतिषेधार्थं सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्यविहितंसाप्तदश्यंप्रकृतौयांचदृष्ट्य
नबाधितंविकृत्यर्थमितिस्थितंविकृतिविषयिकामुचिन्दसुमित्रविदाध्वरकल्यादिषुप्रकरणेसाप्तदश्यंकृतं।नदिदंप्राकरणिकं
सप्तदशसामिधेनीवचनंकिमाज्यभागविधिवदपूर्वनापरसुनायसंहारार्थमितिसंदेहेलकृतोपकाराःप्रकृतौसामिधेन्योया।
नस्तनः॥ नाभिरवनिराकांक्षानेकंतिप्राकृतानाश्रयंसाप्तदश्यंलनारभ्यवादप्राप्तमपेक्षते।सामिधेन्यस्तुचोद्यंनेनाभिश्रापूर्वेनास्कुटा
।भवेदेवमपूर्वत्वंसामिधेनीविधिर्यदि।साप्तदश्यविधिस्त्वेषतस्मान्नापूर्वतासोस्यदृ भवेत्।साप्तदश्यविधौकिमित्यपूर्वतान
भवति।तस्यसामिधेनीभिःसंबन्धस्तासांचाचोदकप्राप्तेर्नचोदकलोपःसंभवति।चोदकलोपश्चापूर्वत्वमितिनसाप्तदश्यविधावपू
र्वत्वं।किंचसाप्तदश्यस्यानारभ्यवादेनसामिधानीसंबंधितयाकृतंयावत्तद्बलेनक्रबद्धुःतांनैवकल्पयतितावत्प्राकरणिके राम.
७०

वचनैरध्वरकल्पादिसंबंधेकृतेसतीणार्थापत्तिर्निकर्मेत्तिरसंबंधंकल्पयति।तेनसाधारस्योपसंहारार्थानिगमाकरणिका।निवच
नानीतिनापूर्ववं मंत्रेष्ववाक्यशेषवद्गुणोपदेशात्स्यात् अनारभ्याश्रूयतेस्वाहाकारेणवषट्कारेणवाहवेभ्योहविःप्रदीयतइ
तिकेषुविहद्विहोमेषुपुनःस्वाहाकारःपठ्यते।पृथिव्यैस्वाहांतरिक्षायस्वाहेति।तदिदमनारभ्यवादप्राप्तस्यस्वाहाकारस्यवि
शेषेषुपुनःश्रवणंसाधारस्योपसंहारार्थमितिमन्वानस्योत्तरं।।पृथिव्यादिशाखावन्मात्रवर्णिकदेवताविधानार्थाः
स्वाहाकारपाठस्तुवषट्कारवैकल्पिकत्वेनानियतंप्राप्तस्यस्वाहाकारस्यनियमार्थोनोपसंहारार्थः।तस्माद्धोमांतरेष्वपिनास्तिस्वा
हाकारस्यबाधः अग्न्यनिग्नाहस्यविकृतावुपदेशादप्रवृत्तिस्यात् अग्निः अनारभ्यवादविहितः।सवाकोनप्रकृतौविकृतिषु
चकासुविहितिनियुज्यते।यथातोग्निमग्निष्टोमेनानुयजतिनमुच्चोनातमतिरात्रेणतंत्रिरात्रेणैवमाद्वादशरात्रादनुक्रां
तं।सोयमग्निर्यासुविकृतिषुवाक्येननोपदिष्टाययाषोडशिषुवाजपेयेच तत्रकिंचोदकप्राप्स्याकर्तव्योनेतिसंशयः। तथाति
ग्नास्थानामग्नहाः प्रकृतौ अकृताः विकृतिषपिकासुचिदुपदिष्टाः उपधेयगर्हीयात्स्य ध्येयगर्हीयादिश्वजितिनिम्नहीतव्याइति।तेषि

शा॰१॰ विकृसंनरेषुग्नाघानेतिसंशयः। तत्र। चोदकेनाग्न्यतिग्नात्सं विकृतौ न प्रदिश्यते। कासुविकृष्वणां तस्य तथा हि स्यादनर्थकं। त
७१ स्मात्तदर्थवत्ताय प्रदेशो नेतिकल्प्यते। तेन यत्रोपदेशस्य तत्रैवान्यत्र न क्रिया। उच्यते। अङ्गं तरवदस्यापि प्राप्तिश्चोदक
तो ध्रुवा चोदकार्थस्य कृत्स्नवाक्याशु विकृष्वणं पुनः। सामान विध्यसिध्यर्थं नातिदेशं निवारयेत्। कोर्थः सामान वि
ध्ये चेद्गुणकाम प्रवर्त्तनां यासु विकृतिषु विधीयते तासु प्रकृतौ च समानं विधानं भवति। विकृसंनरेषु तु चोदकतः
प्राप्तिरिति तुल्यं विधानं। समानविधानत्वे च प्रयोजनमग्न्याश्रितानां गुणकामानां श्येनचितं चिन्वीत स्वर्गकाम इत्यादी
नां तास्वपि विकृतिषु प्रवृत्तिः। गुणकामा हि प्रकृतमग्निमाश्रयंति। प्रकृतश्चाग्निः प्रकृतिविकृतिसाधारणभूत इति त
थाभूतस्याश्रयत्वाद्विकृतिष्वपि गुणकामप्रवृत्तिः। यासु तु विधिर्नास्ति तासु तु न गुणकामाः प्रवर्त्तन्ते निवृत्तिर्वा कर्म्मभेदादिति
न्यायात्। न ह्येवं गुणकामप्रवृत्त्यर्थं विकृतिषु कासुविकृष्वणमिति न तद्बलेनातिदेशाभावः शक्यो नेतुं कल्पयितुं। तस्मादस्त्या राम॰
तिदेशः। अत्रके विदाहुः॥ अनारभ्याधीतोग्निः प्राकरणिकोत्तरवेदिविरोधात्प्रकृतौ न लभते निवेशं। अप्राकृतश्च न विकृति ७१

षतिदिश्यते। तेनोपदेशेनैवास्य विकृतित्वप्राप्तिरिति सनुपदेशतः षोडशिवाजपेययोर्नाग्निष्टोमेन व्यइति। तदप्युक्तं। अग्निष्टो
मवाक्येन प्रकृतावपि विधानात्। ननु विकृतस्याग्निष्टोमातिप्रायंनद्रविष्यति प्रकृतौ प्राकरणिकोत्तरवेदिविरोधात्प्रकरणे
नवाक्यसंकोचो युक्तः। किंच प्रकृतेरेवाग्निष्टोमत्वमनन्यापेक्षं विकृतीनां तु तिदेशापेक्षमिति प्रकृतिरेवानेनाभिधीयते। न
चात्र साधारण्यस्य न्यायः। साधारण्यस्य हि सामिधेनीमात्रसंबंधो वाक्येनावगम्यते क्रतुसंबंधः कल्पयितव्यः। पांचदश्यस्य तु प्र
करणेन संबंधः क्लृप्त इति युक्तं बलाबलं। अग्निष्टोमशब्दस्तु क्रतुमेवाभिधत्त इति तत्संबंधो वाक्येनेतदिति न प्रकरणेन बाधम
र्हति। तस्मादस्ति प्रकृतावग्निरिति विकृतिषु न तिदिश्यते। तत्र साग्निकेषु सारस्वतेषु च सत्रेषु शक्यत्वात्काममग्निर्नचीयतां
षोडशिवाजपेययोस्तु चेतव्यः। उत्पत्तिवाद्दर्थाच्चतुरवत्तं प्रधानस्य होमसंयोगादधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तेर्गुणा
भूतत्वात्॥ दर्शपूर्णमासयोरुपस्तरणाभिघारणे तिद्वि हविषोऽवद्यति अभिघारयतीति विधाय भूयते चतुरवत्तं जुहोतीति तत्र संशयः
ःकिं चतुरवत्तहोमे हविषं चतुरवदानमुपस्तरणाभिघारणे तद्धिके। ध्रुवदानं च पक्षांतरे। उत्तोपस्तरणाभिघारसाभ्यास

शा॰ १ हचंतुरवत्तं हविषो नित्यं द्विरेवावदानमिति। तत्राह द्वितीयासंयोगाच्चतुः खंजनसंस्कृतं होतव्यं हविषः तस्माद्धोतव्यात्स्विष्टं तच्च
७२ तुः। चतुःसत्त्वमिति द्वितीयानिर्देशाद्धोतव्यमेव चतुरवत्तं कर्तव्यं। हविश्च होतव्यं नाज्यं तस्माद्धविष एव चतुरवदानं उपस्तर
णाभिघारणं त्वधिकं न च तेनाधिकेन होमे न चतुरवत्तविघातः तस्याहोतव्यत्वात् तद्धावदान चतुरवदानयोर्विकल्प इति प्रा
प्ते ब्रूमः। चतुःसंख्यावदानस्याहोमाङ्गत्वं चोपगतं यदि। ततः एवं भवेत्तत्तु यथाप्राप्तानुकीर्त्यते। चतुरवत्तं जुहोतीति नात्र च
तुःसंख्याविशिष्टमवदानं होमानुवादेन विधीयते। होमस्याग्नेयादिवाक्यैरप्राप्तत्वेनानुवादासंभवात्। न च चतुरवत्तवि
शिष्टहोमविधिर्गौरवात्। न चाविहितस्याङ्गत्वमतो न चतुःसंख्याहोमाङ्गं। का तर्हि वचनव्यक्तिः। यच्चतुरवत्तमित्युपस्त
रणादिवाक्यैः कथितं चतुरवत्तानुवादेन तत्संस्कारतया जुहोतिना सागदेवतोद्देशानुसन्धिवाक्यसिद्धावत्त्यप्रक्षेपो विधी
यते। उपस्तरणाभिघारणाभ्यां च सह चतुरवत्तं प्राप्तमिति यथाप्राप्तानुवादात् सहैवोपस्तरणाभिघारणाभ्यां चतुरवत्तं। यद्य राम॰
पि होमाङ्गतया चतुरवत्तविधिः तथाप्यवत्तमात्रं विधीयते न चतुःसंख्या वाक्यान्तरप्राप्तानुवादत्वेनापि संभवतो विधाने गौ ७२

खायत्तेः। यद्यपि संख्याहोमांगतया विधीयते तथापि संख्यासाधनमात्रपरिच्छेदेनांगत्वोपपत्तेराज्यस्यापि च संस्कारद्वारेण
होमसाधनत्वादुपस्तरणाभिघारणाभ्यां चतुरवत्तमिसाध्यीयते। एवं च द्व्यवदानस्य प्राप्तिको बाधो न कल्पितो भवति साधद
ष्यवन्नियम्ये न त्क्वचाचिंतेयं। यदा चतुःसंख्याहोमांगतया विधीयते न दाक्षिमाज्यद्रव्यके उपांशुयाजे व तुरवदानं कर्त्तव्यं
ते निसंशयो चतुरवत्तं विहितं कथं संपादनीयमिसपेक्षायामुपस्तरणादिप्रकारविधानात्तस्य च केवलसाम्नाय्यौषध
विषयत्वान्तत्रैव चतुरवदानमुपसंह्रियते साधादृश्यवदिति प्राप्त उच्यते। चतुरवत्तमविशेषविहितं सर्वहोमांगं। न च तत
च्छेषत्वेनोपस्तरणादिविधिः। हविःसंस्कारार्थतया तूपस्तरणाभिघारौ विहितौ। ताभ्यामेव तु सान्नाय्यौषधयोश्चतुरवत्त
संपत्तेर्न हविषश्चमुसद्दीयते। यत्र त्वाज्यभागउपस्तरणादि न श्रूयते तत्राश्रूयमाणःसंपत्त्यभावाद्धविष एव चतुरवदानं प्र
रमार्थत्वस्कनात्र चतुःसंख्या विधीयते। अन्यपरे वाक्ये नुवादत्वेनापि संभवं सोमविधानस्याम्नायपद्धान्नू॥ अतो ऽवत्ता
नुवादे न होमविधिर्न होमांगतया वत्त विधिः। उपांशुयाजाज्ये चतुर्गृहीतं जुहोतीति वाक्याच्चतुर्गृहीतविधिः न च चतुरवत्तवा

शा०१० क्यान् पुरोडाशाभ्यामिसधिकृतोनांपुरोडाशयोनुपदेशस्तच्छ्रुतिर्नाहि स्यसोमवतः दर्शपूर्णमासयोः प्रयतेः पुरोडाशाभ्या
७२ मथासोमयाजिनं यानये धावेनावाग्नेयश्चैन्द्राग्नश्चसान्नाय्यंननुसोमयाजिनमिति। नत्रपुरोडाशाभ्यामेवासोमयाजिन
23 मिति किमयं विरुद्धानुवाद इति संशयः। विधिर्वैवबहवः पक्षाः। अधिकृतोपदेशः एकः कर्म्मोत्तरविधिरितरः। याजनवि
धिरितरस्ततः। कालोपदेशश्चापरः। आग्नेयस्यानुवादः ऐन्द्राग्नस्यपौर्णमास्यां विधिरितरः। तत्रार्थवचाद्विधिः। अनुवाद
स्यानर्थक्यात्। नत्राधिकृतविधिः पुरोडाशाभ्यामेवासोमयाजिनमधिक्रियतेनसान्नाय्येनेति। असोमयाज्येववाताभ्यामधि।
क्रियतेनसोमयाजीति। तदयुक्तं। समस्ताभ्यांहि दर्शपूर्णमासाभ्यां चोदितं फलं नकेवलाभ्यां पुरोडाशाभ्यामसोमया
जिनउत्सत्तुमर्हति। नापिनित्ययोः पुरोडाशयोरनित्यमसोमयाजिनं प्रतिविधिः। तस्मात्कर्म्मोत्तरेणनेविधीयते। नैवं प्रकृ
तप्रसमिद्धानादेवकारानर्थक्याच्चायाजनविधिस्तर्हि भवतु। भाफलाश्रवणात्। परस्मैपदनिर्द्देशाद्धनफलकल्पनापिश राम
क्यते। नेनकालविधिरेवज्यायान्। असोमयागकालेपुरोडाशाविति। तदपिनचतुरस्रं। सान्नाय्यमेकस्मिकालेऐन्द्राग्नः। सा ७२

न्नाय्यं च नासोमयाजी सन्नयेदिति वचनात्सोमयागकालात्सरतः प्रवर्त्तते तेन नहैककस्मिकस्यैन्द्राग्नस्य प्राक्कालः प्राप्त
एवेति नहि विधिर्व्यर्थः। तस्मादाग्नेयस्य पर्वद्वये पि प्राप्तत्वादनुवादः। ऐन्द्राग्नस्य त्वमावास्यायां विहितस्य पौर्णमास्याम प्राप्त
स्य विधिरिति युक्तं। एवकारानर्थक्यात्तु समुच्चितयोः पुरोडाशयोरेकेन लिङ्गश्रवणेन कस्यचिदनुवादः कस्य विधिरिति विशेष
स्य मयुक्तं। तस्मात्सूत्रोक्त एव कालविधिरस्तु। न च प्राप्तः कालः सान्नाय्यं स्य सोमयाजिनोपि विहितं न तु सन्नयेदिति प्राग्
ध्वं च सोमात्सान्नाय्यस्य काल एवेति न हैककालिकस्यैन्द्राग्नस्योभयोः प्राप्तौ संभवं सां प्राक्। स एव नियम्यते। तन्नियमाच्च प्राक्सो
माद्दैन्द्राग्नसान्नाय्य विकल्पेते। पश्चात्तु सान्नाय्यमेव भावनीति युक्तः कालविधिः। नैवं॥ असोमयाजिना कालो लक्ष्यते न चैतद्युक्तं
तस्मात्सान्नाय्येन सोमयाजिनमिति सम्यायमर्थवादः उपांशुयाजमन्तरा यजतीति विर्लिंगाश्रुतिलाघवाकामीप्रनीयतत्र उ
पांशुयाजस्य द्रमे संदेहः। किमर्थं प्राप्तं यत्किंचित्साद्गुनाज्यमेव धौवमिति। तत्र विरोधाश्रवणाद्नियमः प्राजस्यैव नावुपां
शुपौर्णमास्यां यजन्निसस्य कालविधिपरत्वेनद्रव्यविधावसामर्थ्यात्सर्वस्यैवाज्येन ध्रुवायग्न्याजेनय हु वा याम अजमिस्सस्य चवै

श्रा·९ शत्रोपवद्दै स्वबर्न्नमानायदे श्रसरूयस्वविधिसामर्थ्याभावादिति प्राप्ते ब्रूमः। यद्यपि तावद्विधिर्नस्यात्तथाप्यसंयुक्तो सन्नं
७४ धौवमाज्यंप्रयोजनमपक्षमाणामश्रूतद्द्रव्यकेषु पक्वतेषु यागेषु द्रव्याकाङ्क्षेषु निविशते किमुत यद्द्राविस्पष्टं तादर्थ्यं चतुर्थी
संयुक्तं विपरिणामतत्त्व विधिसामर्थ्यं सर्वस्मैवा एतदिति वच्च नमेव विधत्ते तस्मात् धौवाज्यमसद्द्रव्यं तद्द्रव्य देवतायास्यात् उ
पांशुयाजस्यै वदेवतायां संदेहः। किमैर्थप्राप्तायाकाविह नियमेन स्यात्। उताल्लिङ्काच्चि न्नियम इति तत्र विप्ररूपा अुयष्ट
योजामित्राये स्यादेरर्थवादेवाद न्यस्य च देवताविधेरदर्शनाद नियमः। नाविहिता देवता भवति। तस्मादेवतापेक्षायमुपांशुया
जविधिः प्राकरणवशाद्दर्शपूर्णमासतन्त्रगताभिरेकवाक्यतां यातीति तानियमः धर्मो ह्यस्या प्रजापतिः तांत्रिकोदेवता इति
स्थितेकानासामितिचिंसने। देवताविचारसमानहतुकश्चायंकालविचारोपिसदेवते न क्रियते। तदयमत्र विचारः किं प्रजा
पतिर्देवता। उताग्निः। उत विष्णुरमावास्यायांचोपांशुयाजः। किंवोभयोः पर्वणोर्विष्णुः प्रजापतिरग्नीषोमौ च व्यवस्थितवि राम·
षयादेवताः। यद्दामावास्यायां तद्दाविष्णुः यौर्णमास्यां तु प्रजापति अत्राग्नियपत्रं श्रोधपत्रं र्णमास्यामेवस्यात्। कालविधा ७४

नंत्येनश्च नदेवताविधानं मंत्रवर्णाद्देवदेवतानां लब्धत्वाच्छयोः पौर्णमासीकालविशिष्टयागानुवादेन चदेवताविधौ विशिष्टानुवाद
रग्नीषोमौ चेति॥ अथवा पौर्णमास्यामेवोपांशुजो विष्णुप्राप्तश्च तत्रदेवतास्तत्रैव किं कल्प्यंत इति॥ तत्र धर्मसंप्रतिपत्तेः प्रजापति
देवतेति गम्यते॥ स हि यत्किंचित्प्राजापत्यं संयत्तेक्रियते। उपांश्वेव तत्क्रियत इति वचनादुपांशुधर्मः॥ यागोपिचायं तद्धु
र्मेति प्राजापत्यसत्वाध्यवसानं। न प्रजापतिउपांशुधर्मानुमीभावस्तस्य धर्मः प्र।जापतिं मनसा ध्यायेदिति विधेः। तदर्थवादस्त्व
यं यत्किंचित्प्राजापत्यमिति॥ तस्मात्संप्रतिपत्त्यभावात्प्रजापतिः मुख्यत्वादग्निः स्यात्। सोपि न। विष्णुस्तु मंत्रवर्णात्स्यात्।
अग्नयेघैझ्राग्नयाज्यानुवाक्यायुगं तयोर्मध्ये वैष्णवं याज्यानुवाक्यायुगलं आम्नातं। यागश्चायं पुरोडाशद्रव्यकः मध्ये विहितत्वा
त्स्थानसामान्यात्वैष्णवमंत्रद्वयमस्यांगं भवद्विष्णुं देवतां परिकल्पयति॥ आग्नेयैन्द्राग्नयोर्मध्यवर्तित्वाच्च मंत्रयोरमावास्या
कालत्वावगमाद्विशेषविहितोपि यागो मंत्रवशाद्वैष्णवाद्देवतुनिक्तोपि देवतान्यवस्थितविकल्पेन स्युः उभयोश्च पर्वणोरुपांशुया
जः स्यात्। तयाहि जामित्वायेनद्रव्यत्क्रियते यदृचं चोपुरोडाशो नुपांशुयाजमंतरायजसजामित्वायेत्सविशेषेणपुरोडाशाद्दूयत्व

शा॰१॰ स्मिन्नेककाले विधानादुभयोश्च पर्वणोः पुरोडाशद्वयसंभवत्रोपांशुयाजः स्यात्। नन्वमावास्यायां जामितादोषः पाक्षिकः सोम
७५ याजिन ऐंद्राग्नाभावात्॥ तुल्यं पौर्णमास्यामपि पाक्षिकत्वं असोमयाजिनोऽग्नीषोमीयाभावात्। तस्मात्पाक्षिकेनैव जामि
तापनेयेनोभयत्रार्थवादद्वस्तु उभयत्राप्युपांशुयाजः स्यात्। तत्र तावद्ब्रूनामग्नीषोमावाज्यस्यैव नावुपांशुपौर्णमास्यायजन्निसने
75 वचनेन पौर्णमासीकालवर्त्तिनाग्नीषोमदेवताविधानान्मन्त्रवर्णाच्चस्याता मग्नीषोमौ। प्रजापतिश्च मंत्रवर्णात्स्यात्। आग्नेया
ग्नीषोमीययाज्यानुवाक्यार्मध्ये नैत्तिरियाणां प्राजापत्ययाज्यानुवाक्याम्नानात्। विष्णुस्तु पूर्वोक्तेन न्यायेनामावास्यायांस्यादि
तिप्राप्तिभ्रमः। विष्णोर्द्देवतात्वसंमंत्रवर्णाद्धि कल्पनतः। ननु कालद्वयेयागः पौर्णमास्यानुवाक्यनतः उपांशुपौर्णमास्यां यजन्नि
सनेन प्रसक्तवचनेन पौर्णमासीविधानात्पौर्द्वंशोधयत्रं देंषापत्तेः। तस्मादुपांशुयाजानुवादेन कालविधानमेतत्॥ अ
ग्नीषोमग्रहणंनुमांत्रवर्णिकानां देवतानामुपलक्षणार्थं यद्वाश्वलायनाः कालविधिमनिच्छंतः पर्वद्वये प्युपांशुयाजमाः। न राम॰
कथमिवत्रयोदशसाकं वास्यायामिति लिंगं समर्थयरेण। कालविध्यभावेव पौर्णमासीवाक्ये नानुवादासंभवान्पूर्णमासश्वद्देना ७५

पिनफले विनियुध्येनेति प्राधान्यमुपांशुयाजस्य नस्य नस्यान्न्याग्नेयभागादिवदंगतास्यादित्यस्तांनावन्त्रानस्मात्स्योर्णमा
सीकालस्य वाचनिकत्वात्प्रधानानुवर्त्तित्वाद्देवतानानिर्तृणामपि नैव विकल्पः। द्विपुरोडाशायांस्यादं नरार्थत्वात्। पौर्णमा
स्यामेवोपांशुयाज इति स्थिते चिंत्यते। किंसते। किं द्विपुरोडाशायामेव स्यादुतैकपुरोडाशायामपीति। तत्रैकपुरोडाशा
यामंतरा नगुणत्वाभेन वैगुण्यान्न द्विपुरोडाशायामेव स्यात्। सिद्धांतैकदेशी त्वाहायागस्याविशेषेणाश्रवणादुभयत्रानुष्ठा
नं गुणस्तु यत्र द्विपुरोडाशत्वतद्राभविष्यतीति। तदयुक्तम्। विधीयमान एव यागो न त्वन्यगुणविशिष्टो विधीयते। अनुवादेय
श्चानयन्न गुणः तेन यत्रैवायं गुणः तत्रैवास्य विधिरितरत्रानुविधिरेव नास्तीत्यकर्त्तव्य एवेति प्राप्तेभिधीयते। स्यादेवमंतराल
स्य गुणत्वेन विधिर्यदि। कालो विधीयते च तत्र पुरोडाशे न पलक्षितः।। अव्याप्त्याभ्यां हि पुरोडाशाभ्यामुपलक्षिते काले कर्माविधी
धीयते योयं पुरोडाशयोर्मध्यकालस्तत्रोपांशुयाज इति। सर्वत्र वोपलक्षणायायेपि उपलक्षणीयमवतिष्ठते। शंखवेलायामा
गंतव्यमित्यादौ तेन कर्मोगभूतस्य कालस्यैकपुरोडाशीयमपि लाभाभावान्नोपांशुयाजो न बाधितव्यः। न ह्येवं खल्वस्यार्थस्य यद्यपि च नि

शा॰ १॰ षिद्धं विकृतिषु न यथाप्रसाम्नानन्निविधमिहवाध्यं व्यवसितां अनन्तरैन्यस्याभ्युच्चयविधिरिय्येवमुदिता प्रयोगेयत्ता यास्त्व
७६ नउपरिचिंतोपाकुरुते इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां दशमस्याध्यायस्याष्टमः पादः समाप्तः ॥ ॥

76

राम॰
७६